Digitization by eGangotri-South Center

ಕರ್ನಾಟಕ ರಾಜ್ಯ ಮುಕ್ತ ವಿಶ್ವವಿದ್ಯಾನಿಲಯ
ಮಾನಸಗಂಗೋತ್ರಿ, ಮೈಸೂರು – ೫೭೦ ೦೦೬

KARNATAKA STATE OPEN UNIVERSITY
Manasagangothri, Mysore - 570 006

M.A. (FINAL)

SANSKRIT

- KAN. & ENG. MEDIUM -

PRABANDHAḤ

446

Course - 7

Block - 14

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ಉನ್ನತ ಶಿಕ್ಷಣಕ್ಕಾಗಿ ಇರುವ ಅವಕಾಶಗಳನ್ನು ಹೆಚ್ಚಿಸುವುದಕ್ಕೆ ಮತ್ತು ಶಿಕ್ಷಣವನ್ನು ಪ್ರಜಾತಂತ್ರೀಕರಿಸುವುದಕ್ಕೆ ಮುಕ್ತ ವಿಶ್ವವಿದ್ಯಾನಿಲಯ ವ್ಯವಸ್ಥೆಯನ್ನು ಆರಂಭಿಸಲಾಗಿದೆ.

ರಾಷ್ಟ್ರೀಯ ಶಿಕ್ಷಣ ನೀತಿ 1986

The Open University system has been initiated in order to augment opportunities for higher education and as instrument of democrating education.

National Education Policy 1986

ಮುಕ್ತ ವಿಶ್ವವಿದ್ಯಾನಿಲಯವು ದೂರಶಿಕ್ಷಣ ಪದ್ಧತಿಯಲ್ಲಿ ಬಹುಮಾಧ್ಯಮಗಳನ್ನು ಉಪಯೋಗಿಸುತ್ತದೆ.
.....ವಿದ್ಯಾಕಾಂಕ್ಷಿಗಳನ್ನು ಜ್ಞಾನ ಸಂಪಾದನೆಗಾಗಿ ಕಲಿಕಾ ಕೇಂದ್ರಕ್ಕೆ ಕೊಂಡೊಯ್ಯುವ ಬದಲು, ಜ್ಞಾನ ಸಂಪತ್ತನ್ನು ವಿದ್ಯೆ ಕಲಿಯುವವರ ಬಳಿ ಕೊಂಡೊಯ್ಯುವ ವಾಹಕವಾಗಿದೆ.

ಡಾ. ಕುಳಂದೈಸ್ವಾಮಿ

"The Open University system makes use of Multimedia in distance education system.
..... it is vehicle which transports knowledge to the place of learners rather than transport to the place of learning.

Dr. Kulandai Swamy

ವಿಶ್ವಮಾನವ ಸಂದೇಶ

ಪ್ರತಿಯೊಂದು ಮಗುವು ಹುಟ್ಟುತ್ತಲೇ - ವಿಶ್ವಮಾನವ. ಬೆಳೆಯುತ್ತಾ ನಾವು ಅದನ್ನು 'ಅಲ್ಪ ಮಾನವ'ನನ್ನಾಗಿ ಮಾಡುತ್ತೇವೆ. ಮತ್ತೆ ಅವನ್ನು 'ವಿಶ್ವಮಾನವ'ನನ್ನಾಗಿ ಮಾಡುವುದೇ ವಿದ್ಯೆಯ ಕರ್ತವ್ಯವಾಗಬೇಕು.

ಮನುಜ ಮತ, ವಿಶ್ವ ಪಥ, ಸರ್ವೋದಯ, ಸಮನ್ವಯ, ಪೂರ್ಣದೃಷ್ಟಿ ಈ ಪಂಚಮಂತ್ರ ಇನ್ನು ಮುಂದಿನ ದೃಷ್ಟಿಯಾಗಬೇಕಾಗಿದೆ. ಅಂದರೆ, ನಮಗೆ ಇನ್ನು ಬೇಕಾದುದು ಆ ಮತ ಈ ಮತ ಅಲ್ಲ; ಮನುಜ ಮತ. ಆ ಪಥ ಈ ಪಥ ಅಲ್ಲ; ವಿಶ್ವ ಪಥ. ಆ ಒಬ್ಬರ ಉದಯ ಮಾತ್ರವಲ್ಲ; ಸರ್ವರ ಸರ್ವಸ್ತರದ ಉದಯ. ಪರಸ್ಪರ ವಿಮುಖವಾಗಿ ಸಿಡಿದು ಹೋಗುವುದಲ್ಲ; ಸಮನ್ವಯಗೊಳ್ಳುವುದು. ಸಂಕುಚಿತ ಮತದ ಆಂಶಿಕ ದೃಷ್ಟಿ ಅಲ್ಲ; ಭೌತಿಕ ಪಾರಮಾರ್ಥಿಕ ಎಂಬ ಭಿನ್ನದೃಷ್ಟಿ ಅಲ್ಲ; ಎಲ್ಲವನ್ನು ಭಗವದ್ ದೃಷ್ಟಿಯಿಂದ ಕಾಣುವ ಪೂರ್ಣದೃಷ್ಟಿ.

ಕುವೆಂಪು

Gospel of Universal Man

Every Child, at birth, is the universal man. But, as it grows, we turn it into "a petty man". It should be the function of education to turn it again into the enlightened "universal man".

The Religion of Humanity, the Universal Path, the Welfare of All, Reconciliation, the Integral Vision- these *five mantras* should become View of the Future. In other words, what we want henceforth is not this religion or that religion, but the Religion of Humanity ; not this path or that path, but the Universal Path ; not the well-being of this individual or that individual, but the Welfare of All ; not turning away and breaking off from one another, but reconciling and uniting in concord and harmony ; and, above all, not the partial view of a narrow creed, not the dual outlook of the material and the spiritual, but the Integral Vision of seeing all things with the eye of the Divine.

Kuvempu

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ಕರ್ನಾಟಕ ರಾಜ್ಯ ಮುಕ್ತ ವಿಶ್ವವಿದ್ಯಾನಿಲಯ
ಮಾನಸಗಂಗೋತ್ರಿ, ಮೈಸೂರು-೫೭೦ ೦೦೬

प्रबन्धः

Block 14

Course-7

Unit No. 1 to 4	Page No.

घटक 1. भूमिका 1

घटक 2. उदाहरणप्रबन्धाः-१ 11

घटक 3. उदाहरणप्रबन्धाः-२ 29

घटक 4. प्रबन्धः तस्य रचना च 45

1136

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

Course Design and Editorial Committee

Prof. B.A. Viveka Rai

Vice-Chancellor & Chairman
Karnataka State Open University
Mysore-570 006

Dean (Academic)-Convener
Karnataka State Open University
Mysore-570 006

Dr. N. Radhakrishna Bhat
Chairman
Department of Studies
and Research in Sanskrit
Karnataka State Open University
Mysore - 570 006

Subject Co-ordinator & Course Writer

Developed by Academic Section KSOU, Mysore

© Karnataka State Open University, 2004

All rights reserved. No part of this work may be reproduced in any form, by mimeography or any other means, without permission in writing from the Karnataka State Open University.

Further information on the Karnataka State Open University Programmes may obtained from the University's Office at Manasagangotri, Mysore - 6.

Printed and Published on behalf of Karnataka State Open University, Mysore-6 by Registrar (Administration).

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रस्तावना

प्रियाः संस्कृतविद्यार्थिनः

अस्मदीयकर्णाटकराज्यमुक्तविश्वविद्यानिलयस्य स्नातकोत्तरशिक्षणविभागे अन्तिमवर्षस्य संस्कृतकक्ष्यां प्रवेष्टृभ्यः भवद्भ्यः सर्वेभ्यः हार्दं सुस्वागतं व्याहरामि।

जगतीतलस्य प्राचीनतमभाषासु अग्रिमपङ्क्तौ विराजमाना संस्कृतभाषा अद्वितीयत्वेन वर्तते। वैदिकसंस्कृतं लौकिकसंस्कृतमिति संस्कृतं द्विधा विभक्तमस्ति। क्रिस्तपूर्वकाले वेदेषु दृश्यमानेयं भाषा क्रिस्तपूर्वपञ्चमशतके काव्यस्वरूपमलभत इति विदग्धाः विद्वांसः वदन्ति। उत्तरोत्तरकाले संस्कृतभाषासौ उन्नतशिक्षण-शासन-लेखन-काव्यादिषु सततं समुपयुज्यमाना सती सर्वत्र व्याप्तासीत्। विश्वस्य प्राचीनतमभाषासु संस्कृतभाषैव प्रप्रथमा इति भाषाविदः विमर्शकाश्च कथयन्ति। प्रायः लोके पञ्चसहस्र-वर्षाधिकम् इतिहासं लब्धवती संस्कृतादन्या भाषा एकापि नास्ति।

चत्वारो वेदाः विविधानि शास्त्राणि रामायण-महाभारतनामकादीतिहासाः अष्टादशपुराणानि-उपपुराणानि षड्दर्शनानि अनेकानि काव्यानि शास्त्र-व्याख्यानानि प्रशस्तयः शासनानि चाटुपद्यानि सुभाषितानीत्येवं रीत्या विविधप्रकारेषु निबद्धाः कृतयः संस्कृतवाङ्मये भूरि विलसन्ति। एतेषां परिचयः पाठ्यक्रमानुरोधेन यथावकाशं कारयिष्यते। संस्कृते विशेषाध्ययनार्थं गहनतमसंशोधनार्थं च युष्माकं सज्जीकरणमेव स्नातकोत्तरशिक्षणस्य मुख्यः उद्देशः।

आसु अन्तिमवर्षस्य कक्ष्यासु यूयं वेदसूक्तानि उपनिषदं-भगवद्गीतां वैदिकसाहित्यचरित्रं कौटल्लीयम्-अर्थशास्त्रम् याज्ञवल्क्यस्मृतिं वाल्मीकिरामायणे सुन्दरकाण्डस्य कांश्चन सर्गान् प्रबन्धलेखनानि वैयाकरणसिद्धान्तकौमुद्यां समासप्रकरणं भाषाशास्त्रम् आनन्दवर्धनस्य ध्वन्यालोकं मम्मटस्य काव्यप्रकाशं प्राचीना-र्वाचीनालङ्कारिकाणां परिचयं भारतीय-पाश्चात्यसाहित्यविमर्शयोः तुलनात्मकमध्ययनं च करिष्यथ।

युष्माकं स्वाध्यायसुलभाय स्वयंबोधनपद्धत्या (SIM) उपर्युक्तविषयेषु पाठाः विशिष्टरूपेण विद्वद्भिः आरचितास्सन्ति। अनेके विद्वांसः एतान् पाठान् महता परिश्रमेण सज्जीकृतवन्तः तेषां साहाय्यं सकार्तज्ञं संस्मरामि।

यूयं सर्वे एतान् सम्यगधीत्य एतेषु विषयेषु विशिष्टं ज्ञानं सम्पादयत इत्याशासे। "श्रद्धयाग्निः ज्ञानं समिध्यते" इति वेदवाण्यनुसारात् युष्माभिः श्रद्धाकृतमध्ययनं फलप्रदं यशःप्रदं च भूयादिति मदीयः आशयः। शुभं भवतु।

जीयात् गीर्वाणभारती

डा.एन्. राधाकृष्ण भट्
संस्कृतविभागाध्यक्षः
कर्णाटकराज्य-मुक्तविश्वविद्यानिलयः
मानस गङ्गोत्री, मैसूरु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्य खण्डस्य बोधनोद्देशः

अस्मिन् खण्डे यूयं प्रबन्धरचनायाः स्वरूपं प्रक्रियाः च अवगच्छत। अवगमनार्थं उदाहरणप्रबन्धाश्च दत्ताः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घटकः-१

भूमिका

1.1 प्रबन्धरचनायाः स्वरूपम्

1.2 प्रबन्धरचनायाः उपयोगः

1.3 अस्य विषयस्येतिहासः

1.4 प्रबन्धरचनायाः प्रकारः

1.5 प्रबन्धरचनायाः प्रक्रियाः

1.6 प्रबन्धरचनायामुपयोगिनः बहिरङ्गनियमाः

1.7 उपसंहारः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घटकः-१

भूमिका

1.1 प्रबन्धरचनायाः स्वरूपम्

अथातः प्रस्तूतये प्रबन्धरचनायाः प्रक्रियादिविषयमधिकृत्य किञ्चिद्वक्तुम्। प्रबन्धः, प्रस्तावः रचना, संदर्भः निबन्ध इत्येते शब्दाः समानार्थत्वेनैवाद्यत्वे व्यवह्रियन्ते। तत्रैतैः शब्दैरस्मिन् प्रसङ्गे किमभिप्रेयेत इति प्रश्ने संक्षेपत एवमेव वक्तव्यं यत् किमपि प्रतिपाद्यविषयमवलम्ब्य तत्स्वरूपोपयोगमहत्त्वादि-प्रदर्शनपुरस्सरं उपपत्तिपूर्वकं च हृदयग्राहिण्या भाषया तद्विषयकस्वाभिमतार्थस्य प्रतिपादनमेव तदर्थः।

1.2 प्रबन्धरचनायाः उपयोगः

प्रबन्धरचनायाः अभ्यासस्य क उपयोग इति जिज्ञासायामुच्यते-प्रथमं तावदस्योपयोगः स्वबुद्धेर्विकासार्थं भाषायां यतेर्दार्ढ्यार्थं च। तथा चास्महिचारशक्तेः परिमार्जनं विकासः पुष्टिश्च यथा प्रबन्धरचनाया अभ्यासेन जायते, न तथाऽन्येन केनाप्युपायेन। एवं भाषायाः गतिः प्रतिष्ठा च यथा प्रबन्धलेखनेन सुदृढा सम्भवति, न तथाऽन्यथा। द्वितीयं स्वविचाराणां प्रचारार्थमप्यस्योपयोगः। सार्वजनिकदृष्ट्या आवश्यकानामुपयोगिनां च तत्तद्विषयाणां सम्बन्धे स्वविचारप्रचाराय सामयिकपत्रादिषु प्रबन्धलेखनमेवात्युत्तमोऽभ्युपायः।

1.3 अस्य विषयस्येतिहासः

सोऽयं विषय आपाततो नवीनत्वेन प्रतीयमानोऽपि न हि वस्तुतः ईदृङ् नवीनः। सत्यं, प्राचीनसमये प्रबन्धरचनेति विशिष्टनाम्ना न हि कश्चिद्विषयः प्रायेण पठनपाठनजिधेरङ्गमासीत्। तथापि प्राचीनदर्शनशास्त्रेषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्तदधिकरणरूपेण, नीत्यादिग्रन्थेषु कथाऽऽख्यायिकादिभिः, पुराणेतिहासादिग्रन्थेषु तत्तद्दृष्टान्तसहकारेण च भिन्नभिन्नप्रकारैरेकार्थप्रतिपादनं दृश्यत एव।

कौटिलीयार्थशास्त्रे, (अधिकरण १५) सुश्रुते (उत्तरतन्त्रेऽध्यायः ६५), चरके (सिद्धिस्थानेऽध्यायः १२), तन्त्रयुक्तिप्रकरणं, पूर्वोत्तरमीमांसयोः 'अधिकरण' स्वरूपप्रतिपादकानि वाक्यानि, अन्येषु समानार्थप्रतिपादकानि वचनानि प्रकारान्तरेण प्रबन्धरचनाप्रक्रियाप्रतिपादकान्येव सन्ति।

सत्यप्येवं, अद्यत्वे विशेषरूपेण विशिष्टविषयत्वेन च प्रबन्धरचनायाः विषयेऽवधानं दीयते आधुनिकपठनपाठनपरिपाट्याम्। एतावदेवान्तरं प्राचीन-नवीन-परिपाट्योः।

1.4 प्रबन्धरचनायाः प्रकारः -

यद्यपि प्रतिपाद्यविषयाणामानन्त्यात् प्रबन्धकर्तृबुद्धिवैचित्र्याच्च कति प्रकाराः प्रबन्धा इति विषेषतो निर्दिष्टुं न शक्यते, तथापि त्रिपकारत्वं सामान्येन तेषामभ्युपगम्यते -

१ निरूपाणात्मकाः प्रबन्धाः

२ आख्यानात्मकाः प्रबन्धाः

३ आलोचनात्मकाः प्रबन्धाश्चेति।

तृतीयभेदान्तर्गतताया वस्तुवर्णनात्मकाः, वृत्तान्तवर्णनात्मकाः, विचारात्मकाश्चेति नामोल्लेखनं भवितुमर्हति।

तत्र कमपि चेतनमचेतनं वा पदार्थमधिकृत्य तत्स्वरूपादिनिरूपणपराः प्रबन्धाः निरूपणात्मकाः (Descriptive Essays) इत्युच्यन्ते।

कामप्यैतिहासिकं सामयिकीं वा घटनां वृत्तान्तं वाऽधिकृत्य तदाख्यानपराः प्रबन्धाः आख्यानात्मकाः (Narrative Essays) इत्युच्यन्ते।

कमपि गूढं विमर्शसापेक्षं विषयमवलम्ब्यालोचनात्मकदृष्ट्या यथावश्यकं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पक्षप्रतिपक्षनिर्देशनेन च तद्गुणदोषादिविवेचनपराः प्रबन्धाः आलोचनात्मकाः (Reflective Essays) इत्युच्यन्ते।

अस्मिन्विषय प्रविवक्षूणां दृष्ट्या सामान्यरूपेणैव ह्येषविभागः प्रबन्धानामिति द्रष्टव्यम्। वस्तुतस्तु नैष एकान्तिको विभागः। तथा च दृश्यते हि विभिन्नभाषासु प्रसिद्धलेखकानां प्रबन्धेष्वेषां भेदानां परस्परं संक्रमः संसृष्टिश्च।

1.5 प्रबन्धरचनायाः प्रक्रियाः

तत्र निरूपणात्मकानां आख्यानात्मकानां च प्रबन्धानां विषये न ह्यत्र बहु वक्तव्यमपेक्ष्यते। प्रथमं तावत् संस्कृतपरीक्षासु आलोचनात्मका एव प्रबन्धाः प्रायेणापेक्ष्यन्ते। किञ्च द्वयोरप्याद्ययोः प्रकारयोः बहून्युदाहरणानि पुराणादिग्रन्थेषु महाकाव्येषु च दृश्यन्ते। इत्थञ्चैभिः कारणैः अत्र आलोचनात्मकप्रबन्धानामेव किञ्चित्संक्षेपेणोच्यते।

आलोचनात्मकप्रबन्धरचनायाः प्रक्रियाविषयेऽनेकानि प्राचीनानि च मतानि दृश्यन्ते।

तथाहि - पूर्वोत्तरमीमांसाशासनयोस्तत्तद्विषयकप्रबन्धानां अधिकरणसंज्ञा प्रसिद्धा। "एकार्थप्रतिपादको विषयसंशयपूर्व पक्षसिद्धान्तनिर्णयात्मक-पक्षाङ्गबोधकवाक्यसमुदाया-न्वयोऽधिकरणम्" इति हि पूर्वमीमांसाया तल्लक्षणम्। तथाचोच्यते -

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्। निर्णयश्चेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृतम्।।इति।।

तत्र विचारार्हं वाक्यं विषयः। तस्यार्थविषये विशय (संशयः) इदमित्थं नवेति विकल्पः। तत्र संदिह्यमानयोः पक्षयोः असत्पक्षे युक्तिप्रदर्शनवाक्यं पूर्वपक्षवाक्यम्। पूर्वपक्षोक्तां युक्तिम् अङ्गीकृत्य अपरिपूर्णवत्, सत्पक्षे युक्तिप्रदर्शनवाक्यं सिद्धान्तः। 'ततश्च' इत्याद्यभिलाषेन सिद्धान्तसिद्धार्थोपसंहारकं वाक्यं निर्णयवाक्यमिति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उत्तरमीमांसायां तु तत्रैकमधिकरणं पञ्चावयवम्। विषयः संदेहः, संगतिः पूर्वपक्षः सिद्धान्तश्चेति पञ्चावयवाः इति विशेषः।

एतदनुसारेण प्रबन्धरचनाया अपि विषयादीनि पञ्चाङ्गानीति वक्तुं युक्तम्।

परन्तु विषयभेदात् लेखकानां रीतिवैचित्र्याच्च संभवत्यपि एषां विषयसंदेहादीनां अनेकेषु स्थलेषु प्रबन्धरचनाया अङ्गत्वेन हि एकान्ततस्तेषां सर्वत्र समानावश्यकता।

सर्वविधेष्वपि प्रबन्धेषु समानत्वेन एकान्ततश्च आवश्यकान्यङ्गानि तु त्रीण्येव संभवन्ति। तानि चैतानि-उपक्रमः, उपपत्तिः, उपसंहारश्चेति। सत्यप्यावश्यकत्वेऽन्येषामङ्गानां तेषामेतेष्वेवान्तर्भावः कल्पयितुं शक्यते।।

तत्र उपक्रमे तावत्सामान्यरूपेण विषयप्रस्तावना विषयस्वरूपोद्देशस्तदुपयोगिता चेत्यादि प्रदर्शनीयम्।

उपपत्त्या तत्तद्विषये साध्यक-बाधक युक्ति प्रमाणोपन्यासपूर्वकं विभिन्नसिद्धान्तानां अनेकदृष्टीनां च समालोचनया विचारणं स्वाभिमतार्थस्य प्रतिपादन च विधेयम्। यथावश्यकं प्रसिद्धसमुचितदृष्टान्तैरपि स्वाभिमतार्थस्य शेषणं कर्तव्यम्। किं बहुना, यदपि प्रसङ्गादागते सङ्गतं च तद्विषय आवश्यकं भवेत्तदत्र प्रपञ्चनीयम्।

उपसंहारे तु पूर्वोक्तानां प्रधानहेत्वादीनां संक्षेपेणानुवादपूर्वकम् अथवा अनुवादमन्तरेणैव प्रतिपाद्यविषयस्योपसंहारः कर्तव्यः।

1.6 प्रबन्धरचनायामुपयोगिनः बहिरङ्गनियमाः -

प्रबन्धरचनाया उपक्रमात्पूर्वं सामान्येन एते नियमा अनुसरणीयाः --

१) प्रथमं तावत् प्रतिपाद्यविषयस्वरूपस्यावधारणं कर्तव्यम्। प्रतिपाद्यविषयं सम्यगवधार्यैव प्रायशः प्रवर्तन्ते रचनां कर्तुं विद्यार्थिनः। ततश्च रचनायाम् असङ्गत्यादिदोषा अपरिहार्या भवन्ति।

1137

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२) ततः तत्सम्बन्धिविचारणां स्वयं विमर्शश्चिन्तनं च विधेयम्। एवं स्वयं विमर्श एव बुद्धिविकासे मुख्यं कारणम्।

३) तदनन्तरं तद्विशेषविषयोपयोगिविचारणां कृतेऽन्यग्रन्थानामनुशीलनं विधातव्यम्।

४) सामान्येन, सामयिकपात्राणाम् इतिहासादेः काव्यग्रन्थरत्नानाम् अन्यस्य चैवंविधस्याध्ययनं तथा तत्तद्विषयोपयोगिसुभाषितादीनां कण्ठस्थीकरणं निबन्धरचनावसरे प्रासङ्गिकविचारणाय संस्फुरणाय तेषामुद्धरणाय चावश्यकम्।

५) प्रकृतविषयोपयोगिनां प्रस्तुतरचनाङ्गभूतानाम् अवान्तरविषयाणां प्रथमं सस्फुरणक्रमेणैव एकत्र समासतो लेखनं विधेयम्। अनन्तरम् अर्थानुपूर्व्येण शृङ्खलाबद्धाः सूत्ररूपेणैव ते लेखनीयाः। एवं रचनोपक्रमात् पूर्वमेव समासतो रचनायाः स्थूलरूपेण आकारो लेख्याः। एवं प्रधानाङ्गानां लेखनानन्तरं तेषाम् औचित्यानौचित्यादि विचार्य, साकल्येन च रचनास्वरूपम् अवधार्य पश्चाद्रचना विधेया।

अन्तरङ्गनियमाः --

१) समस्तप्रबन्धस्य यथावश्यकं त्रिष्वधिकेषु वा खण्डेषु विभागः कार्यम्। ते च खण्डाः पृथक् स्वातन्त्र्येण लेखनीयाः। तत्र प्रथमे खण्डे विषयस्योपपत्तिः, अन्तिमे चोपसंहारः कर्तव्यः।

२) अत्रेदमवधेयं यदत्र प्रतिपादितान् साधारणनियमान् वर्जयित्वा नहि रचनाशैलिविषये निश्चिता व्यवस्थिता वा नियमास्सन्ति। प्रधानप्रतिपाद्यविषयस्य रक्षां कुर्वन्, भाषायां औचित्यं च परिहरन् प्रबन्धलेखको येन केनापि प्रकारेण स्वेच्छया रचनाकरणे स्वतन्त्रः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३) विचारेषु स्वोपज्ञता, भाषायां स्वभाविकता च अवश्यं भवेत्।

४) रचनायां यावदुपपत्तिप्रकारस्य प्राधान्यं, न तावत्तत्तद्विषकसिद्धान्त-विशेषाणाम्। रचनाप्रकारो युक्तियुक्तः हृदयग्राही चेत्, तत्तद्विषये यस्य कस्यापि सिद्धान्तस्य प्रतिपादने लेखकः स्वतन्त्रः।। शब्दान्तरेषु "किं प्रतिपाद्यते" इत्यस्यापेक्षया कथं प्रतिपाद्यते इत्यत्रैव विशेषतोऽवधानं देयम्। प्रबन्धेषु हि-

विषयाणां दुरूह्याणामपि बुद्ध्या स्वतन्त्रया हेतूपपत्तिभिर्युक्ता सिद्धान्तोक्तिरपेक्ष्यते।

५) रचनायाः परिमाणापेक्षया तस्याः प्रकारः, शैली चाधिका आवश्यकी। शोभनप्रकारेण रचितोऽल्पतरपरिमाणोऽपि निबन्धोऽशोभनप्रकारेण रचितादत्यधिकमादरास्पदम्।

६) पुनरुक्तव्याघातादिदोषा अन्ये अपि अलङ्कारशास्त्रप्रतिपादिता दोषाः परिवर्जनीयाः।

७) यथा प्रबन्धोचितसुभाषितादिवचनोल्लखो रचनायाः शोभामावहति, तथैवात्यधिकोऽप्रासङ्गिको वा तेषामुल्लेखो रचनायाः सौन्दर्यमपहरति।

८) नैव कश्चिद्व्यवस्थितः प्रकारो रचनायाः उपक्रमस्य विषये। बुद्धीनां रुचीनां च वैचित्र्यात् वैचित्र्यमत्र दुर्वारम्। नैव सर्वेषु विषयेषु समान एवोपक्रमप्रकारः समुचितः। प्रतिपाद्यविषयानुकूल्येनैव रचनाया उपक्रमेण भवितव्यम्।

९) उपसंहारप्रकारोऽपि नैव सर्वत्र समानः। लेखकादिभेदेन विभिन्नता अनिवार्या तथाहि-कदाचित्पूर्वमुक्तानां समासेन पुनरावृत्तिद्वारैव समाप्तिः क्रियते। कदाचित् पुनरावृत्तिमन्तरेणैव। एवमन्येऽपि भेदाः उपसंहारप्रकारे दृश्यन्ते।

एवमन्येऽपि नियमा दर्शयितुं शक्यन्ते। ते पुनः प्रसिद्धलेखकनां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रबन्धानामनुशीलनेन स्वयमेव छात्रैर्निर्धारणीयाः। किं बहुना तथापि स्मर्यताम्-

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते।
अनुज्झितार्थसंबन्धः प्रबन्धो दुरुदाहरः।।

(शिशुपालवधे-२-७३)

रीतिं विचिन्त्य विगणय्य गुणान् विगाह्य
शब्दार्थमनुसृत्य च सूक्तिमुद्राः।
कार्यो निबन्धविषये विदुषः प्रयत्नः
के पोततन्त्ररहिता जलधिं तरन्ते।। (काव्यमीमांसा)

किञ्च, शब्दार्थग्रथनकौशलस्य महत्त्वमप्यत्र प्रसङ्गे न विस्मरणीयम्। यथाहि -

त एव गदविन्यासाः ता एवार्थविभूतयः।
तथापि नव्यं भवति काव्यं ग्रथनकौशलात्।।

अपि च -

यानेव शब्दान् वयमालपामो
यानेव चार्थान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभाव्यैः
संमोहयन्ते कवयो जगन्ति।।

1.7 उपसंहारः -

एवमत्र संक्षेपेणैव कृतं प्रबन्धरचनायाः प्रक्रियादिनिरूपणम्। तन्निदर्शनभूताश्च केचित्प्रबन्धा अत्र विलेखिताः रुचिवैचित्र्येण शैलीवैचित्र्यस्य प्रद्योतनार्थं च न केवलं स्वकर्तृका एव, किन्तु अन्यप्रसिद्धलेखकनिबद्धा अपि प्रबन्धाः यथावश्यवं संयोजनीया अपि। सर्वत्र निबन्धेऽनपेक्षितार्थः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्याज्यः। पुनरुक्तिरपि प्रयोजनान्तरप्रकाशने न दोषाय। उपक्रमोपसंहारयोः विषयैकसूत्रता अवर्जनीया भवति।

प्रकृष्टबन्धलक्ष्योऽसौ प्रबन्धस्समुदाहृतः।
यत्रैकसूत्रता बोध्या आमूलाग्र विलक्षिता।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

NOTES :

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घटकः-२

उदाहरणप्रबन्धाः--१

2.1 अपारे काव्यसंसारे कविरेकः प्रजापतिः

2.2 कविः

2.3 सङ्घे कलौ युगे शक्तिः

2.4 परोपकारः

2.5 विद्यार्थिनः ग्रन्थालयाश्च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घटकः-२

उदाहरणप्रबन्धाः-१

2.1 अपारे काव्यसंसारे कविरेकः प्रजापतिः

अनादिकालप्रवाहायातं निखिलमिदं जगतीतलं "धाता यथापूर्वमकल्पयत्। दिवञ्च पृथीवीञ्चान्तरित्क्षमथो स्वः" इति भगवत्याः श्रुतेः अनुसारेण विधात्रा कल्पादौ पूर्वपूर्वकल्पानुसारेण वा सृष्टं त्रिगुणात्मक सत् सुखदुःख मोहस्वभावात्मकमेव। तत्र सकललोकैककारणेन भगवता नारायणेन सृष्टिनिर्मातुः पदेऽभिषिक्तुः प्रजापतिः अभुक्तप्राणिकर्ममिः कालवशात् प्राप्तपरिभोगसमयैः स्वफलप्रदानाय तत्तत्कर्मानुसारिणीं प्राणिनां भौतिकीं सृष्टिं करोति। परन्तु प्रारम्भे च किङ्कर्तव्यताविमूढ प्रजापतिमवलोक्य परमकारुणिको भगवान् स्वयमेव विधिं वेदमध्यापयन् परमादिकविरूपेण चिदानन्दमयी आध्यात्मिकीं च सृष्टिं तनोति। यदादिशति भगवती श्रुतिः -

"स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्।

कविर्मनीषी परिभूस्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः।।" इति।।

इमाञ्चानादिकविकृतामाध्यात्मिकसृष्टिपरम्परां सञ्चालयितुं नलिनोद्भव-वाल्मीकि-व्यासकालिदासप्रभृतयः कविशिरोमणयः शारदाकृपाकटाक्षभाजः काव्यसंसारं परमाह्लादैकमयं ससृजुः। अयमेवापारः क्रान्तदर्शिकृत्यात्मक-काव्यसंसारः भौतिकसंसारात् अत्यन्तं विलक्षणः, यो हि भौतिकसंसारे प्राणिषु श्रेष्ठानां, सदसद्विवेकशालिनां, कर्तव्याकर्तव्य जिज्ञासूनां धर्मार्थकाममोक्षरू-पचतुर्वर्गफलप्राप्तिकामानां मानसिकबुभुक्षाशान्त्यर्थम् आध्यात्मिकपिपासातृप्त्यर्थं च समजायत। अतो विलक्षणस्यास्य काव्यसंसारस्य परमोपादेयत्वं परमावश्यकत्वं च। यतो हि विशाल-विषयाटवीवलयलग्नदावानलं निखिलमिदं विरिञ्चिप्रपञ्चप्रपञ्चिते जगतीतलमाधिव्याधिसमाकुलप्रतिफलमाकीटपतङ्ग-मानवसमूहं दुःखत्रयाभिभूतं सन्तापयतितराम्। दुःखत्रयदाहेनानवरतं दन्दह्यमाना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मानवा न मनागपि कदाचित् शान्तिं लभन्ते "अशान्तस्य कुतः सुखम्" इति ध्रुवसत्यकथानुसारेण दुःखाम्बुधौ निमग्नान् मनुजान् सुखयितुं कुबेरविभवादपि भव्यतरं सारस्वतवैभवं च तेभ्यः प्रदातुं काव्यरससुधामाधुरीं पाययितुं सत्यं शिवं सुन्दरं चेति दिव्यपथं प्रदर्शयितुं शक्तिनिपुणाताभ्याससहिताः कविप्रजापतयः अलौकिकं काव्यसंसारं निर्ममुः।

2.2 कविः

अस्यालौकिकस्य काव्यसंसारस्य यो हि प्रजापतिः कविः सः कीदृश इति जिज्ञासाऽपि स्वाभाविकीति प्रारम्भादेवास्य विचारस्समजायत।

"निरुक्ते" मेधाविनामसु पठितः कविशब्दः क्रान्तदर्शनो भवति। "अतीतानागतविप्रकृष्टविषयकं ज्ञानं यस्य सः क्रान्तदर्शनः" इत्युवटाचार्यः। 'क्रम' धातौरैणादिके 'इन्' प्रत्यये बाहुलकान्यस्य

वत्वे रेफस्य लोपे च कविरिति निष्पद्यते। अथवा गत्यर्थकात् कवतेरिनिप्रत्यये कविः सिद्ध्यति। अतः श्रुतिः - "विश्वरूपाणि प्रतिमुञ्चते कविः" इत्यादिना प्रतिपादयति - कविः सर्वाणि रूपाणि प्रज्ञानानि रूपवत् शोभनार्थेषु आबघ्नातीति। अतो 'मेधावी कविः क्रान्तदर्शनो भवति। कवतेर्वा' इति यास्कः।

वस्तुतस्तु वर्णनार्थककवृधातोः कविशब्दो निष्पन्नः सृष्टितत्त्वविस्तारार्थं प्रकाशयति तथा च सृष्टिरहस्यविस्तारं यथादेशकालं सम्प्रकाश्य सर्वानपि सहृदयान् रसास्वादनैकप्रवणान् करोति। अत एव कवयति विस्तारयति इति कविरिति व्युत्पत्त्या निष्पन्नोऽयं शब्दः अपूर्वचमत्कारादिवस्तुवर्णने क्षमस्यैव वाचकः, न तु इतिवृत्तमात्रवर्णनकारकस्य। अत एव भट्टतौतेन "काव्यकौतुक" अभिहितम् -

1138

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

"नानृषिः कविरित्युक्तमृषिश्च किल दर्शनात्।
विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम्।।
स तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः।
दर्शानात् वर्णनाच्चाथ रूढा लोके कविश्रुतिः।।" इति।।

किञ्च - "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।
तदनुप्राणनाज्जीवेत् वर्णनानिपुणः कविः।"

भट्टनायकमतेन यः सहृदयपाठकान् अर्थं ग्राहयति, भावनं कारयति, अर्थात् साधारणधर्ममूर्तेः स्फुरणं कारयति, तथा आनन्दं प्रत्याययति, स एव कविः।

लोचनकारस्यापि मते अपूर्व - वस्तु - निर्माणक्षमा प्रज्ञा प्रतिभा। तस्या विशेषो रसावेशवैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वम्। एवं प्रतिभासम्पन्नः। अपूर्ववस्तुनिर्माणकुशलः एव जनः कविर्नान्यः। अत एव मम्मटेनाप्युक्तम्-

"लोकोत्तरवर्णनानिपुणः कविः, यस्य कर्म काव्यं भवति यतो हि कविः अपूर्वकाव्य-सृष्टिं करोति अतोऽयं प्रजापतिः। अत एवाग्निपुराणकारेणोक्तम् -

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।
न कवेर्वर्णनं मिथ्या कविः सृष्टिकरः परः" ।।इति।।

भारतीयकाव्यशास्त्रानुसारेण कविः कर्ता निर्माता, स्रष्टा, दर्शयिता, वर्णयिता, भावयिता, व्यञ्जयितेत्यादिशब्दवाच्यो भवति। अतस्तस्य कर्म काव्यं निर्माणं निर्मितिः सृष्टिरित्यादिभिः शब्दैर्व्यवह्रियते। कवेः प्रतिभा कारयित्री एव न चानुकारयित्री अतः काव्यं करणमेव, न चानुकरणम्।

भट्टानायकस्य मतेन भावनेन भावकत्वेन वा मुख्यव्यापारेण कविः स्वप्रतिभावैशाल्येन वस्तुनस्तदेवापूर्वं रूपं भावयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महिमभट्टस्य मतेन प्रतिभावान् सत्कविः पदार्थस्य सामान्यविशष्टात्मके द्वे रूपे, विशिष्टं रूपं प्रत्यक्षीकृत्य तदेव स्वप्रतिभया प्रकटयति।

अभिनवगुप्ताचार्यस्याभिव्यक्तया पदार्थस्याप्रकटं रूपं कविः विशिष्टरूपेण प्रकटयति। अत एवापूर्ववस्तुनिर्माणक्षम एव कविः प्रजापतिः, तस्यैव कर्म काव्यम्। अत एव हेतोः भामहेनोक्तम् -

गतोऽस्तमर्को भातीन्दुः यान्ति वासाय पक्षिणः।
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते।।।।इति।।

इत्थञ्च - "श्रृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेत् नीरसं सर्वमेव तत्।।
भावनाऽचेतनानपि चेतनवच्चेतनामचेतनवत्।
व्यवहारयति यथेष्टं काव्ये रसतात्पर्यवतः कवेस्तदिच्छया तादभिगतरसाङ्गतां न धत्ते।।इति।।"

एवं प्रकारेणैव काव्यं कुर्वन् कविः प्रजापतिपदवीं लभते।

अत एव कविवाङ्निर्मितिवैशिष्ट्यं मम्मटेन प्रादर्शि नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्

नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।। ।।इति।।

तथा चेदमत्र निर्व्यूढम् -

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम्।
रसयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः।। "

2.3 सङ्घे कलौ युगे शक्तिः

चराचरात्मकेऽस्मिन् परिवर्तनस्वभाववति जगति ब्रह्मबीजविकल्पात्मके नैके पदार्थाः विचित्रानन्तशक्तिमन्तः सहृदयहृदय-धर्म-मुद्रा-प्रभावाङ्कनजागरूकाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकृति-सत्ता-गति-भेद-भिन्नाश्चकासतीति तत्त्वविदां सतां शिष्टानां सम्मतं मतं च। अयं च ब्रह्मपथः विश्वव्यापकः अनन्तवस्तुतत्त्वसमन्वयनिरूपकः सचेतसां चेतांसि समावर्जयतीति नैसर्गिकी वस्तुस्थितिः। विचित्रसहजतया स्वरूपतः समन्विताताः अपि पदार्थाः परिसरप्रभावान्विताः कार्यकारिणः दरीदृश्यन्ते। स्थितावस्यां पदार्थेषु केचन संहत्य कृतिभाजः केचन चासंहत्येत्ययं मार्गमनुसरन् स्वरूपं यथार्थतः प्रकाशयति। इत्थं च मूलविकाससंतत्योः विद्यमानायां क्रमवृत्तितायां युगधर्मभेदेन वस्तुस्वरूपव्यष्ट्या समष्ट्या च कृति-गति-शीलं भवति।

कालस्सर्वस्य परमं मूलम्। तस्य परिवर्तनं विलक्षणं कार्यं करोति कारयति च। तत्प्रभावान्तर्गतस्सर्वोऽपि तदायत्त-सत्ता-गति-स्थितिकः स्वीयां शक्तिं विस्तारयति। अत एव तत्तद्वस्तुनिष्ठाऽपि शक्तिः सुव्यक्ताऽपि अव्यक्ता भवति। एतदनुरोधेन वस्तुसंहतिसतैव कार्यप्रयोजिका दृश्यते। व्यष्टिवृत्तमपि समष्टिवृत्तमपेक्षते। न चैतावता वस्तुनिष्ठा नैसर्गिकी शक्तिः न कार्यसाधिकेति प्रतीयते। कालचक्रगर्भान्तःपातित्वात् यथार्थ्यमावृतं भवति।

अत एव च तत्र पदार्थसङ्घः साफल्यं प्रसूते। अत्र युगप्रभावः अवर्जनीय इति तत्त्वविद आमनन्ति।

तथा च कालगर्भेऽस्मिन् वस्तुधर्मोऽभिभूयते।
तदात्वे व्यष्टिवृत्तस्य कायशक्तिर्निगूह्यते।
अत एव कलौ विद्यात् सङ्घे शक्तिर्विशेषतः।
तनुते कर्मसाफल्यं संहतिः सर्वसाधिका।।
वस्तुतत्त्वाविनाभूतसङ्घचक्रं प्रवृत्तिमत्।
असाध्यं साध्यतां नीत्वा सत्प्रयोजनमश्नुते।।
कलनात्काल इत्याहुस्सृष्टितत्त्वप्रमापकाः।
कलनेन पदार्थेषु सतौ शक्तिः प्रकाश्यते।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सङ्घपदार्थः --

"समूहस्संहतिस्सङ्घः" इति कोशानुरोधेन विशकलिततया विद्यमानानां पदार्थानां ऐक्यरूपेणानुभव एव सङ्घपदार्थः प्रथते। एवञ्च सृष्टिरेव सङ्घीभूय परिदृश्यमानाऽपि प्रकृत्यावरणदशायां विशकलितत्वेनावस्थितत्वात् तदनुभवोऽतीव दुर्लभ इत्यनुभूयते। यदा वा पदार्थधर्मः स्वतः प्रकाशको न भवति तदैव स्वसहकारिकारणसमवधानादात्मलाभप्रदो भवति। इत्थञ्च निसर्गतस्संहत्या लब्धात्मनां पदार्थधर्माणां आस्वमूलप्राप्ति समष्टिवृत्यैवावस्थितिः सृष्टौ रूढमूलाऽनुभूयते। ईदृशस्सङ्घवानुत्तम इति तत्त्वदर्शिनस्सङ्गिरन्ते। स्वरूपतः प्रकाशतश्च समष्टिवृत्तेनास्थितानां पादर्थरूपाणां स्वान्तर्धर्मभङ्गलक्षणो व्यष्टिरूपः सङ्घः अत्यावश्यकः प्रतीयते। विना तेन कालचक्रमेव न परिभ्रमति।

तथा चान्तास्थ-धर्माणां संहत्या यावता स्थितिः।
तावताऽभिन्नलक्ष्यत्वं सङ्घलक्षणलक्षितम्॥

शक्तिपदार्थः --

शक्तिर्नाम पदार्थनिष्ठः सृष्टिसिद्धः सामर्थ्यधर्माऽपूर्वानन्तसत्ताप्रकाशकः अतिशय इति वस्तुतत्त्वविज्ञानिनाम्मृषीणां परमं हृदयम्।

तथा चानन्तसामर्थ्यं वस्तुनिष्ठं प्रभासते।
व्याप्तं येन जगत्सर्वं शक्तिमान् सम्प्रवर्धते॥

पदार्थातिशयो यत्स्यात् सृष्टितत्त्वप्रभासकः।
शक्तिरूपेण सर्वत्र तनुते कार्यमुत्तमम्॥

तथाच वस्तुसत्ता या येन सर्वत्र तिष्ठति।
स एव परमा शक्तिः स्वापूर्वाख्याऽभिलक्षिता॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शक्तिः पदार्थसामर्थ्यं स्थूल-सूक्ष्म-परान्वितम्।।
व्याप्यव्यापकभावेन विश्वस्मिन् भाति शाश्वती।।

इत्थञ्च सङ्गवृत्तेन युगधर्मानुसारतः।
जगत्यनन्ता शक्तिस्स्यात् समासव्यासलक्षणा।।

एवञ्च सृष्टितत्त्वप्रकाशकानन्त-विलक्षण पदार्थ-धर्मसङ्घ एव किमप्यपूर्वमतिशयं सम्प्रकाश्य वर्तमानोऽसम्प्रमादावहोऽपि सम्प्रमोदावह एव सर्वमप्यतिशेते। तथा च सङ्घवृत्तपदार्थधर्ममतिशय्य स्थिति-गति-प्रवृत्ति-भिन्नं किमपि कामनीयकत्वमातनोतीति पदार्थलक्षणतत्त्वज्ञानां समयः।

सङ्घः पदार्थधर्मस्य संहतिः परमाद्भुता।
अपूर्वातिशयाद्दिव्या विश्वस्मिन् भासते चिरम्।।

इत्थञ्च सृष्टिविकासक्रम एव स्वस्वधर्मव्याप्ता संहतिः एकरूपेण अनेकरूपेण च जगदमितस्समुल्लसन्ती पदार्थातिशयसमन्विता, सर्वामनुभूतिं समनुविदधातीति तत्त्वमर्यादो चकास्तीति सारम्।

यश्च यदा धर्मात्माऽतिशयः कृतयुगे पदार्थस्वरूपाविनाभूतः कार्याणि सफलान्यातनुते द्वापरयुगे च स्वातिशयप्रकाशकसामग्रीसमन्वित, त्रेतायुगे च बाह्याभ्यन्तरवृतपरिपोषकसम्पदनुद्योतितः कलौ च समष्ट्यात्मकसङ्घलक्षितः पदार्थयावद्धर्माविनाभूतः विलक्षण-लक्षणाभिलक्षितसदभिसंलक्षितश्च स्वपूर्वातिशयपदविक्रान्त इति सृष्टिरहस्यविदां परमा निष्ठा। अत एव युगेऽस्मिन् सङ्घ एव शक्तिर्विद्यत इत्यत्र न कस्यपि सचेतसस्संशयगन्धः। यानि प्रभावप्रभासकानि माहात्म्यसमन्वितानि कार्याण्यत्र सन्ति भविष्यन्ति च तानि सर्वाणि सङ्घरूपेणैवानुष्ठीयमानानि सामर्थ्यवन्ति समुल्लसन्तीत्यद्वापरम्। तथाचैकं तृणं प्राणिबन्धनासमर्थमपि तत्सङ्घातरूपेण समर्थं, यथा चैको मानवः महत्कार्यं सफलीकर्तुमसमर्थोऽपि सङ्घरूपेण सुतरां शक्तः यथा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च वैकस्तन्तुः बालकैर्भङक्तुं समर्थोऽपि तत्सङ्घतात्मा सुतरामसमर्थः किञ्चानेकैस्तन्तुभिर्गुणत्वमापन्नो मत्तमातङ्गबन्धनायामपि समर्थः। तथैव मनुष्य एकाकी समग्रयन्तरानन्वितः असङ्गतात्मा किमपि कर्तुमनीश इति निश्चप्रचम्। तदुक्तं केनापि सुमतिना कविनाऽस्मिन् सन्दर्भः -

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।

तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः।।

अपि च यथैकं काष्ठं न कस्यापि संतरणाय प्रभवति, एवमपि तदेव सङ्घातरूपेण नौकारूपमास्राद्य महतीं सेनापरम्परामपि नदीं सन्तारयितुं सर्वथा शक्नोति। इत्थञ्च ब्रह्मणः सृष्टौ कदापि काचिदपि सङ्घे शक्तिरभिव्यक्ता विद्यत इति विषये न कस्यापि विप्रतिपत्तिः। किंबहुना जीवनमेव सङ्घरूपं सत् परिपूर्णताया पर्यवस्यतीति तत्त्वविदो निगदन्ति। अत एव जीवपरसङ्गतिरूपसङ्घे स्वरूपेणैव परस्य परया मुद्रया सर्वत्र सदातनीं च शक्तिं प्रतिष्ठाप्य परिपूर्णतां भजन्ति चेतनापरंपराः अथवा परिपूर्णतायामेव प्रतितिष्ठन्ति। यतः तदा -

"पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।"

इति सङ्घातीतावस्थायाः सङ्घरूपेण कार्याण्यनुष्ठाय सङ्घातीतावस्थायां पूर्णत्वेनावस्थितिः शान्तिमन्त्रपरिपुष्टा विभाति तस्य केचनस्येति विश्वजनं नः पन्थाः। अत एव सङ्घेऽव्यक्तो मूलात्मा। व्यक्तेश्च विकासात्मा सृष्टिकार्यप्रयोजकश्शोभतेतराम्। प्रतिपदं विद्यमानः सङ्घः कलनात्मककलियुगे व्यक्ततामापद्यत इति तत्त्वम्। एवञ्च युगधर्मानुसारेण सृष्टिसिद्धः सङ्घः अव्यक्तव्यक्तरूपेण सुप्रतिष्ठितः कलौ सर्वत्र व्यक्ततामातनोतीति प्रकृतिसिद्धम्। न ह्यकलनं व्यवकलनं वा कदापि किञ्चिदपि कर्तुं वलृतं भवति क्वचिदपि। परन्तु सङ्कलनं किं किं न सम्भावयति कल्पलतेव विद्येव। तदत्र स्पष्टं सुष्ठु चान्वबोधकेनापि सृष्टितत्त्वमामूलाग्रं सविजानता केनापि क्रान्तदर्शिना-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संहतिः श्रेयसे पुंसा स्वकुलैरल्पकैरपि।
तुषेणापि परित्यक्ताः न प्ररोहन्ति तण्डुलाः।।

बहूनामल्पसाराणां समवायो दुरत्ययः।
तृणैर्विधीयते रज्जुर्बध्यन्ते तेन दन्तिनः।।इति।।

व्यक्तं तदत्र सम्बोध्यं सङ्घे शक्तिः कलौ युगे।
कलनेनैव सर्वार्थाः सङ्घास्सिद्ध्यन्ति वस्तुतः।।

2.4 परोपकारः

जगदिदं विचित्रविविधवस्तुसंकुलसृष्टिसिद्धमेव परस्परं वस्तुषु उपकार-धर्म-सत्तागति व्याप्तिः रूढमूला आमूलाग्रं च समेधमाना विभाव्यते। मरणशीलेऽस्मिन् संसारे पञ्चभूतविस्तारात्मके प्रपञ्चे पदार्थाः संहत्य विद्यमाना अपि धर्मव्याख्यभावे मिथः संहत्य न विभान्ति। सर्वस्यास्य परमं मूलं निर्विकारपदमेव। इत्थञ्च सृष्टिरेव परोपकारार्था विराजते। प्रकृतिस्तु स्वाविनाभूतवती विविधगतिमती भवति। तत्र च स्वार्थता स्वार्थतापरमार्थता चेति द्वयीयं गतिः। तत्रापि च स्वार्थता न केवलं भौतिकविश्रान्ताऽपि धर्मसमन्विता चेत् तदा परार्थपर्यवसायिनी तत्त्वमन्वर्थयति। तदात्व एव भौतिकं अभौतिकान्वितं भवति। अन्यथा सत्त्वं भवायत्तं स्वरूपानन्वितमेव कार्यव्यापाप्रतिरोधकं भवति। तथा च पादर्थानां स्वरूपनयनं दृढबन्धं विना नोपपद्यते परोपकारशब्देन परकार्यसाधनं, परदुःखनाशनं, परसुखनिधानं च श्रुतान्यारभमाणानां दिव्यमुद्दिश्यते। अत एव परोपकारबुद्धिः मनोधर्मानुकूलताया विविधापि अप्रकाशताऽपि परार्थनिष्ठत्वं स्वस्यानुमापयति। वस्तुतः पुरुषार्थे तथापि धर्मकृत्यानां मध्ये परोपकाराः अत्यन्तं समुत्कृष्टं कर्म लक्ष्यते। सर्वेषामपि धार्मिकगतिमत परोपकार एव विशिष्टतत्त्वमिति ज्ञातव्यं सर्वदेति तत्त्वंविधः आमनन्ति। सः स्वयमेव प्रकृतिचक्रं विशिष्टं विविधगतिप्रापि पुण्याय

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पापाय च भावयति। अत एवार्यं -

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।

परोपकारः पुण्याय पापाय परपीडनम्।।इति।।

संसारेऽस्मिन् परोपकार एव स्वस्वजन्मसार्थक्याय मुख्यतया व्याप्रुवन्नपि स्वहितमार्द्रचित्ता अन्वाभजति। परोपकार एवानुत्तमो धर्म इति प्रथमान एति देवत्वलक्ष्म। अत एव सद्भिः सर्वथा परोपकाराय विविधलक्ष्मलक्ष्यमभिव्याप्य चकास्ति धर्मपुरूषाः। आंहुश्च

"परोपकाराय सतां विभूतयः" ।।इति।।

जगत्यस्मिन् विचित्रगत्यनुवर्तनशीले विविधाः

विचित्र-विभिन्नप्रकृतयः जनाः परिदृश्यन्ते। सर्वेऽपि स्वरूपानुरूपतया कर्म सतां प्रभावात् सफलाय कल्पन्ते।

वस्तुतः सद्भावपरिपूर्णाः परदुःखिताः लोककल्याणकामनया परोपकारव्रतपरायणाः स्वार्थरहिताः सन्तः कर्मणिं विदधति। प्रकृतिरेव परोपकारमुद्रान्विताः-

"परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।

परोपकाराय दुहन्ति गावः परोपकाराय सतां विभूतयः"

इति आबालगोपालमनुभूयते।

किञ्च- रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जनाः।

एते परोपकाराय युगे दैवेन निर्मिताः।।

ततश्च परोपकारः सज्जनानां स्वभावः। तेषां शरीरशोभां वर्धयति सदा परोपकारः अयमेव विशिष्टं भूषणं -

"श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।

विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन।।"

1139

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत एव प्रत्येकं नरः प्राणैरपि धनैरपि नरेण परोपकारः कर्तव्यः सः परोपकारञ्जं पुण्यं क्रतुशतकादपि भवति। सज्जनानां परोपकाख्यसद्विषये कोऽपि कविस्स्पष्टयति -

रागिणि नलिने लक्ष्मीं दिवसो विदधाति दिनकरप्रभवाम्।
अनपेक्षितगुणदोषः परोपकारः सतां व्यसनम्।।

पशवः मृत्याः परमपि स्वचर्म परार्थमुसृत्ज्योपकुर्वन्ति -

परोपकारशून्यस्य धिङ् मनुष्यस्य जीवितम्।
जीवन्तु पशवो येषां चर्माप्युपकरिष्यति।।

संसारोऽसौ स्वार्थजालबद्धः दृश्यते। किन्तु मनुष्यः प्राणिषु श्रेष्ठः। अस्योद्देशोऽपि श्रेष्ठतमस्स्यात्। इयमेय मानवस्य मानवता यत् स्वक्षुद्रस्वार्थसीमानं परित्यज्योच्चाशयने जीवनम्। मानवां खलूत्पन्ना भूत्वा सर्वेऽप्युदरपोषण कुर्वन्ति म्रियन्ते च। परन्तु जातः यः आत्मनः उत्कर्षं करोति, श्रेष्ठतमं कार्यं करोति, स्वार्थभावनायाः परित्यागं करोति, स एव मुक्तो भवति। अत एवासौ परमः पुरुषार्थः। तथा च -

"धन्या नरा विहितकर्मपरोपकाराः"
आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः।
परं परोपकाराय यो जीवति स जीवति।।
परोपकरणं येषां जागर्ति हृदये सताम्।
नश्यन्ति विपदस्तेषां सम्पदस्तु पदे पदे।।
"क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्।।"

इह खलु विविधविचित्रविचित्रिते जगति दृष्टिपथमायान्ति द्विविधा मानवाः-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संशयात्मानो निश्चयात्मानश्च। आद्यास्तावदखिलेष्वासाद्य स्वीयमनोरथेष्वनिश्चितान्तःकरणा भवन्ति। ततश्च "संशयात्मा विनश्यति" इत्याद्यभियुक्तोक्त्यनुसारं नैव ते स्ववाञ्छितमर्थमधिगन्तुं शक्ताः। प्रथमं तु तेषामप्रवृत्तिरेव स्वमनोरथसाधनार्थं। कथञ्चित्प्रवर्तमाना वा स्वरूपेनैवावरोधेन निरुद्धाः स्वाभीप्सितसाधनव्यापारान्निवर्तन्ते। ततश्च तेषां मनोरथाः "उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः" इति न्याय्येन केवलं मनोमोदकसदृशा एव भवन्ति। द्वितीयास्तु स्वाभीष्टेष्वर्थेषु स्थिरनिश्चयाः प्रयतमाना भवन्ति। नैवेह त्रिलोक्या महान्ति कष्टानि कृच्छ्राणि तपांसि अन्यानि दुःखानि स्वीयव्यापारान्निवर्तयितुं तान् प्रभवन्ति। तानेतान् द्वितीयामिधानेन मानवोत्तमानभिलक्ष्य कविकुलगुरोः कालिदासस्य सुभाषितमिदं प्रवृत्तम्।

इत्थं च वाञ्छितार्थसम्पादने दृढनिश्चयं मनः निम्नस्थलप्रवृत्तं च सलिलं कः प्रतीपयेत् ? न कस्यापि तन्निरोधनशक्तिर्विद्यते।

कस्येतदविदितं यत् "मनोरथानामगतिर्न विद्यते" इत्यनुसारं नानाविधमनोरथरतमानवकुलसंकुलेऽस्मिन् भुवने नैजावाञ्छितानुरूपं तत्तत्कार्यसम्पादनपरा विविधव्यापारव्यापृताः समायान्ति दृष्टिपथमशेषां मानुषाः। परं स्वस्वव्यापारपराणां तेषां नियतिवशान्नियतमेव प्रायशो जायते प्रचुरविघ्नसन्ततिसमुद्रभूतिः। तत्र ये लघीयांसोऽधीरवस्तेऽसहमाना वियत्परम्परास्त्यजन्त्येव स्वाभीष्टाधिगतेः प्रत्याशाम्। ये तु सत्यसन्धा अप्रहतप्रतापमहानुभावाः—प्राणोपहारेणापि प्रतिश्रुतादर्थादविस्मरणशीलाः नयवञ्चकाः मानवास्त एव स्वाभीप्सितार्थेषु साफल्यं लभन्ते। सोत्साहधने हि विरहहृदये न जातु खेदोऽधैर्यं वाऽवकाशं लभते।

तादृशानेव दृढङ्कल्पान् मानवकुलतिलकानुद्दिश्य गीयते –

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम्।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्च - अङ्गनवेदी वसुधा कुल्या जलधिः स्थली च पातालम्।
वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य वीरस्य।।

सत्यमेवंविधा एव महासत्वा विघ्नपरम्पराः समायान्तु, सपदि राज्यलक्ष्मीर्विलयमेतु, शिरस उपरि कृपाणधाराः पतन्तु, किं बहुना, प्राणात्ययेऽप्यभीप्सितमर्थमेवोदितं मन्यन्ते।

कनकस्य निकषोपल इव तेषां परीक्षणायैव व्यसननिकषोपफलोदयः। तदत्र स्मृतिपंथमायाति भर्तृहरेः पद्यमेतत् -

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणाः न परित्यजन्ति।।

सार्वकालिकं सार्वदेशिकं चैतत् वृत्तं मानवकुलवतंसानाम्। इतिहासपुराणेषु तावत् शतशो गाथा एतदर्थनिदर्शनीभूताः श्रूयमाणा आह्लादयन्ति नश्चेतांसि।

यथा हि भगवति कैलासाधिपतौ तपस्यति, समाधिभङ्गार्थमतिमात्रं मन्मथेन प्रयत्ने कृतेऽपि न हि समाधिभेदाय कोऽप्यन्तरायः प्रभुर्बभूव। तथा चाकर्ण्यते

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसङ्ख्या न परो बभूव।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति।।इति।।

यथा वा भगवत्युमा सर्वेश्वरेण हरेण साकं विवाहार्थं कृताध्यवसाया, तदर्थं कृच्छ्रं तपश्चरन्ती, त्वग्वासांसि धारयन्ती मात्रा मेनया च बहुविध स्वाभीप्सितार्थान्निवार्यमाणाऽपि, व्रतभङ्गमकुर्वती तपसैवासीत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अद्यत्वेऽपि बाष्पयान-विद्युद्यन्त्र-व्योमयान प्रभृतिविषयिका अपि चेतोविस्मायापन्नवर्णनीया समन्ततस्समुन्नतिः समालोक्यते सोऽपि चारुचरित्रचर्चितानां स्वाभीष्टार्थादविस्मरणशीलानां मानवकुलतिलकानामेव वृत्तिः। अहरहो वा स्वाभीप्सितार्थस्थिरनिश्चयानामनेकेषां व्योमयानादिविज्ञानसमुन्नत्यै कृतप्राणपरित्यागानां संवादः कस्य वा सहृदयस्य हृदये विस्मयादिभावान् नोद्भावयन्ति ? तत्सत्यमुदीरितं स्थिरनिश्चयं मनः केनापि कथमपि प्रतिनिवर्तियितुं न शक्यत इति।।

2.5 विद्यार्थिनः ग्रन्थालयाश्च

जगदिदं चराचरभिन्नविचित्रविद्याबीजसमुद्भूतं सत् स्वरूपप्रकाशकं स्वरूपप्रतिष्ठापकं च सुशोभते। अस्मिन् विद्यमानः प्राणिसङ्घा अपि विद्याबीजात् समवाप्तव्यक्तस्वरूपाः यथास्वं विद्यामुद्राप्रकाशकास्सदा चकासते। एवञ्च विद्यायाः स्वतः प्रकाशवत्याः जगदाधारदीपस्तम्भरूपायाः सहजास्वादनाभावे सर्वमप्यन्धतामेव भजते। "विद्या" पदं "विद्" "या" धातुद्वयसमुत्पन्नं ज्ञानानुभूतिजनकं भासते। ईदृश्याः विद्यायाः अर्थी विद्यार्थी। अनेन च प्रार्थनाविशेषेण मानवः स्वरूपप्रतिष्ठितो भवति। तथा च स्वजीवनविकासकदिव्यसाधनसम्पदेव विद्येति आर्यभारतमहर्षिसिद्धान्तः प्रथते। अस्या विद्यायास्सुतरामभावे जगत्यान्ध्यमेव प्रसज्यते इत्यद्वापरम्। अस्याश्चार्थिनोऽपि सत्संस्कारसंस्कृतान्तःकरणा एव सर्वत्र राजन्ते।

"सा विद्या या विमुक्तये" इत्यार्षप्रयोगोऽपि विद्याध्ययनसर्वबन्ध-विमोचकमिति। स्पष्टयति ईदृश्याश्च विद्यायाः तपस्याभूमिकामात्राभिव्यक्तायाः भौतिकक्षेत्रेषु कार्यनिर्वाहाय उत्तमं साधनमपेक्ष्यत एव। तच्च ग्रन्थतत्तदालयस्वरूपमित्यत्र तु न विप्रतिपत्तिः काचित्। सर्वत्र मूलाविरोधेन विषयग्रथनमेव ग्रन्थः। अत्र चानुभूतिप्राधान्यमेव। न तु तद्रहितं सत्फलं प्रभूतेऽध्ययनम्। तदैव विषयस्वरूपानुभूतिसत्तापि स्वतः प्रकाशते।

इयं च विद्या परापरभेदभिन्ना सर्वाधारभूता प्रशस्ता विद्यते। तत्र

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वेदसाहित्यं सर्वं पराविद्यारूपम्। "यया तदक्षरमधिगम्यते" इति तदध्ययनेनाक्षरस्थानप्राप्तिः स्वतःसिद्धा। विद्यार्थिनः जीवनं स्वरूपत आत्मप्रकाशरूपमिति सृष्टिरूपया। तत्र च न कस्यचित् वैषम्यप्राप्तिः।

"विद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति उपनिषज्जागर्ति। अनया च विद्यालङ्कृतः पुरुषः न स्वरूपमतिक्रामति कस्यांचिदपि विषमावस्थायाम्। विद्यालोकेन स्वगतं पाशित्रयं समूलघातं निर्हन्ति। अत एव "विद्वान् सर्वत्र पूज्यते" इति शिष्टोक्तिरपि प्रयोगक्षेत्रेऽस्मिन् सर्वसायिनि समुल्लसति। तस्मात् न विद्यार्थिनः आत्मारामाः विवक्षिततमोग्रन्थयः सत्त्वमात्रप्रतिष्ठिताः परमसुपोषिताः सर्वतो विकुण्ठितगतयः सर्वबन्धविनिर्मुक्ताः परमाकाशमधिष्ठिन्वन्ति। अतस्ते दिव्यज्योतिःपुञ्जा एव विभासन्ते।

ईदृशस्य च विद्यायाः ईदृशस्य च विद्यार्थिनः उत्तमं प्रयोगक्षेत्रं ग्रन्थालयः। अत्र सर्वाणि ज्ञानानि एव विनिर्गच्छन्ति। अत एव ग्रन्थालयः सर्वविधोऽपि विद्यासंबन्धित्वात् न जडः। अपि तु चेतनात्मा। तेजस्विनीविद्यार्थिनां आत्मानं तत्त्वम्। ततश्च विद्यावृत्तमात्मशोधकं भवति। अज्ञानतमस्-लिप्सा-गर्व-अभिनिवेशादिनाशकं विभाति। अनेन च विद्यायाः स्वतःसिद्धाः लोककल्याणं सर्वबन्धविवृत्तिश्च भवति। अत एव-

"विद्याधनं सर्वधनप्रधानम्" इति कथितम्। क्रान्तदर्शिनी सारस्वती। पुनः विद्यार्थिजीवनं अतीव रुचिकरं विभाति। अतश्शैशवावस्था परोक्षानुभवेनैव व्यावहारिकज्ञानसाक्षात्कारात्मिका ग्रन्थालयसंस्कारा द्वितीयावस्था विद्योतते तराम्। विद्यार्थिनां च वस्तुतोऽयं स्वरूपभावः-

काकचेष्टा बकध्यानं श्वाननिद्रा तथैव च।
अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणम्॥

विद्यार्थिनः सर्वे ज्ञानरागाः विधूतरागस्तामलाः प्रकाशकाः। ज्ञानदीपाः, ज्ञानकविद्यासहायाः ग्रन्थालयवृत्तप्रकाशकाः आजीवनमध्ययनसम्पन्नाः भवन्त्येव खलु। एवं च जीवननौकासञ्चालको ग्रन्थालयो नाम शिक्षणीक्षणसंक्षिप्तसर्वस्व एतद्ग्रन्थः जीवनविनाभूतः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तपस्या सम्प्रकाशितविषयविस्मारकप्रकृतिमण्डलमधिष्ठति । विषयग्रथनग्रन्थालयो लब्धाजन्मा विद्यार्थिसन्मित्रमिव तज्जीवनं सर्वदा पवित्रयति । तथा च विद्यार्थिग्रन्थालययोः उपजीव्योपजीवकभावस्स्वतस्सिद्धः नित्यश्च भासते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

NOTES :

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घटकः-३

उदाहरणप्रबन्धाः २

3.1 देशाटनस्य प्रयोजनम्

3.2 जनसङ्ख्यावृद्धिः कुटुम्बकल्याणं च

3.3 वरदक्षिणा

3.4 परिसरमालिन्यम्

3.5 मस्तिष्कयन्त्रम्

3.6 समूहमाध्यमाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घटकः-३

उदाहरणप्रबन्धाः-२

3.1 देशाटनस्य प्रयोजनम्

जीवनं जीवगत्यात्मकं सर्वदा गतिशीलम्। इत्थञ्च सद्गतिमत्वमेव जीवनस्य परमं लक्ष्यम्। अत एव "दिश-अतिसर्जन" इति अतिसर्जनार्थकधातोरयं शब्दः निष्पन्नः समीपनयानार्थमभिव्यनक्ति। अट-गताविति गत्यर्थकधातोर्निष्पन्नोऽटनशब्दो गत्यर्थं ब्रवीति। एवञ्च जीवने मनुजः यदनस्थां परिपूर्णतां नैति तत्स्वरूपनयनानुकूलगतिविशिष्टं व्यवहारं देशाटनं प्रकाशयति प्रथयति च। स्वरूपप्राप्तिनिरूपकगतिशीलात्मकदेशाटनस्य परमं प्रयोजनम् आमूलाग्रं लौकिकालौकिकसमस्थितिप्रकाशनमेव। ईदृशं खलु देशाटनम् अध्ययनाङ्गं सत्पूर्णत्वमाविष्कारयति। अत्र मिथः देशाटनाध्ययनयोः आश्रयाश्रयिभावः निरूप्यनिरूपकभावश्च स्वतस्सिद्धो विद्यते। ईदृशेन देशाटनेन स्वरूपविकासः तदाधारभूतवृद्धिविकासश्च स्वतस्सिद्धतया सम्भवतः।

भ्रमणेन विना तस्मात् परिपक्वसमस्थितिः।
सदाऽध्ययनशीलस्य जीवनेऽपि न जायते।।
प्रकृतिक्रोडसः सन्मार्गलक्षितार्थानुचिन्तनम्।
स्वदेशस्याटनादेति पूर्णत्वमथ गच्छति।।
बुद्धिर्विकासतामेति देशाटनपरं क्षणात्।
तन्मूलं जीवनं दिव्यं परसान्निध्यमृच्छति।।

इत्थं चाचिरस्थायिनीं युवावस्थां जीवनं च देशाटनं चिरस्थायिनामक्षणिकं च सम्पादयति। न ह्यसंवेद्यापरिपूर्णवस्तुतत्त्वो मानवः कदाचिदपि पूर्णत्वमधितिष्ठति। अतो मानवजीवने देशाटनस्य महन्महत्त्वं विद्यते। अनेके भ्रमणशीलाः पुरुषाः देशाटनेनैव प्रसिद्धाः। तच्च नानाविधन्यूनतापरिहारात्मकं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हिताहितप्राप्तिपरिहारानुकूलक्रियात्मकं च दिव्यमनुत्तमं चौषधम्। देशाटनेन विभिन्नदेशीयभाषापरिचयः विभिन्नसंस्कृतिपद्धतिक्रमावगतिश्च भवति। भ्रमणेन प्रकृतिगतिचित्रणविभिन्नानुभूत्या कष्टसहिष्णुत्वं बुद्धिवैशाल्यं च समेधत एव।

किञ्च स्वभावतः जिज्ञासोः प्रकृतिप्रेमिणः पुरुषस्य सहजा वाञ्छेयं असकृज्जागर्ति यदीदृशविशेषाः कीदृशाः ? कीदृशं च मानवजीवनं? कीदृशी च प्रकृतिः एतेषां चान्योन्यं विद्यमानः व्यतिकरश्च कीदृशः ? इति किञ्चिदिव परिशीलनीयम्। मानवः स्वतस्सिद्धतया प्रकृतिमध्यवृत्तवती सन् स्वकीये जीवने परशक्तिस्वरूपप्रकृतिमुद्रास्सर्वदा धरति धारयति च। अनया च प्रकृया देश-मानव-प्रकृतिसम्बन्धः सहजोऽपि रूढमूलः भवति। ततश्च आधिभौतिकमध्यात्मवृत्तं गतिः मानवस्य स्वरूपे प्रतिष्ठिता भवति। अत एव दिशतीति देश इति व्युत्पत्त्या आधिभौतिकात् आध्यत्मिकं यावत् जनिमतः स्वमूलं नयति प्रकृतिचक्रम्। इत्थञ्चेहपरात्मोस्सम्बन्धः स्वरूपतः विद्यमान एवाभिव्यक्तो भवति। अत एव अटतीत्यटनमिति व्युत्पत्तिः द्यावापृथिवीवृत्तं समन्वयति जीवनयात्रायाम्। अनया च सत्तया सर्वदा सदा दिव्यविभूत्यनुभूतिरेव सुव्यक्ता स्वरूपप्रतिष्ठापर्यवसायिनां भवति ईदृशेन देशाटनेन पूर्णताऽभिव्यक्तिः सहजसिद्धा निरूपिता सुलक्षिता च भवति। अस्मादेव कारणात् विहाय सर्वान् कामान् चेतनः यथाग्रामं यथानगरं यथादेशं च परिभ्रमति। अत्रान्तरे समुपस्थितानि सर्वाण्यपि कष्टानि तृणवत् मन्यते। अन्तरायैः मुहुर्मुहुः प्रतिहन्यमाना अपि देशाटनं कुर्वन्ति। यस्मात् -

देशाटनं पण्डितमित्रता च वराङ्गना राजसभाप्रवेशः।

अनेकशास्त्रार्थविलोकनं च चातुर्यमूलानि भवन्ति पञ्च।।

तथा च देशाटनेन विविधप्रयोजनानि सम्भवन्ति। प्रप्रथमतः स्वाभाविकप्रवृत्त्या शारिरकबौद्धिक्योः समन्नत्यर्थं देशाटनमत्यन्तमवर्जनीयम्। तत्रापि व्यवहारज्ञानप्राप्तिविधिरभिलक्ष्यते। नानादेशपुरुषमनोधर्माद्यनुभूतिमान् नानाभाषाविज्ञानप्रत्ययवांश्च भवति। येन भौतिकी बौद्धिकी जीवनगतिरसकलायोपकल्पते। किञ्च पुरातत्त्वसम्बन्धीनि बहूनि तत्त्वानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

देशमाटमाटं तत्तद्देशीयलेखैः ज्ञायन्ते। सनातनार्यमहर्षिधर्मसंस्कृतिमुद्रावासिर्विशेषतो देशाटने नभोभूयते ततश्च तदीयधर्मसंस्कृतिप्रचारोऽपि सम्यक् क्रियमाणः जीवनं पूरयितुं सर्वदा प्रयतते।

भारतीयमहर्षिधर्ममुद्राङ्कितदेशगमनात् जीवने विलक्षणविशिष्टस्थितिरुत्पद्यते। तत्प्रभावान्वितं जीवनविचारादेव सद्वृत्तमयं सत् परिपूर्णतामेति। इत्थमुपलक्षितानुभूतिमान् पुरुषः न कदापि व्येति द्वन्द्वातीतश्च स्वजीवनं परमपदं नयति अधिष्ठापयति च। तथा चाभूतपूर्वाम् अश्रुतपूर्वां च विष्ठां जीवनसत्तां प्रापं प्रापं विकारमध्यवर्त्यपि न कदापि व्याकुपितोऽभिलक्ष्यते।

इत्थं देशाद्देशान्तरं परिभ्रमन् मानवः ऐतिह्यरसिकः भौगोळिकतानास्थित्यनुभूतिज्ञः विश्वस्य परमं मित्रं भवति। तेन च स्वपरजीवनगत्योः आमूलाग्रं समभिवृद्धिर्विशिष्यते

ततः

परार्थ-स्वार्थ-लक्ष्यत्वं जीवने निर्विशेषतः।
समासाद्य नरः श्रीमान् विश्वराज्येन भासते।।

न कदाप्यनया कृत्या वैधर्म्यमनुवर्तते।
स्वस्थचित्तः परं स्थानं प्राप्य शान्तस्समेधते।।

यथा च देशाटनं मानवस्य तद्व्यक्तित्त्वस्य च विकासं कुर्वन् तं सदा समभिवर्धयति। अत एवानेकानि सुन्दराणि असुन्दराणि वस्तूति प्रदर्शयत् विषमपरिस्थितिभिः मानवस्य स्वरूपं न विकारयति। सर्वत्र संमत्वमत्तया प्रतिष्ठां करोति अथ च दिव्यजीवनसोपानान्यपि संपादयति। अनेन च शत्रुटीकां समीकर्तुं परस्य च क्षन्तुं सर्वथा समर्थो भवति। विश्वव्यापकपवित्रदृष्टिनिष्ठया स्वस्य व्यष्टिगतं स्वरूपं समष्टयङ्गतया व्यवस्थापयन् मानवः समष्ट्यात्मा व्यवहरति जागर्ति स्वयं जागरयति चाप्रबुद्धान्। आपत्तिकालेऽपि धीरस्सन् कदापि विविध-विषम-परिस्थितिमध्यवृत्तोऽपि स्वमनोदार्ढ्यतया किञ्चित् अपि कथञ्चिदपि न विचलति। भौतिके व्यवहारक्षेत्रे देशाटनस्य प्रभावः निरवधिकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपरिमितश्च। अत्र च पञ्चतन्त्रीयकथा वाचोयुक्त्यनुचिन्तनं महते प्रयोजनाय भवति -

देशान्तरेषु बहुविधभाषावेषादि येन जातम्।
भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थम्।।इति।।

जगत्यस्मिन् तस्य मानवस्य जन्म व्यर्थमेव येन भूतले नानाप्रकाराणां देशानां भ्रमणं पर्यटनञ्च न कृतम्। देशाटनं विना मानवाय पर्याप्तमात्रायां धनधान्यस्य प्राप्तिरपि न भवितुमर्हति। यथोक्तं -

"विद्या वित्तं शिल्पं तावन्नाप्नोति मानवस्सम्यक्।
यावत् व्रजति न भूमौ देशाद्देशान्तरं हृष्टः" ।।इति।।

देशाटनं मानवस्य हृदये आत्मिकैककतायाः ज्ञानं सञ्चालयति। तस्य भेदबुद्धिर्विनष्टा भवति। अनेन विश्वबन्धुत्वस्य पन्थाः प्रशस्तो जायते। अस्मिन् विज्ञानयुगे द्यावापृथिवीदेशाटनाय निरवधयस्सुविधाः समुपस्थापिताः। एवञ्च केचन बाष्पयानेन, केचत जलयानेन, केचन च व्योमयानेन निस्संशयं यथेष्टञ्च देशाटनेन अस्मत्स्वरूपपरिज्ञानं भवति। आसां सुविधानां वृद्धेः अन्ताराष्ट्रियतमा भावना मानवानां हृदयेषु समुत्पन्ना। अद्य शनैः शनैः मानवः सङ्कुचित-संप्रदाय, परपराबन्धं सङ्कुचितविचारपरंपरां च परित्यज्य स्वविश्वपरिवारस्य सदस्यं मन्यताम्। इत्थञ्च देशाटनात्

उदारचरितानां तु वसुधैव कुटुम्बकम्

इति उदात्ता भावना सर्वत्र सुप्रतिष्ठिता भवति।

3.2 जनसङ्ख्यावृद्धिः कुटुम्बकल्याणं च

माल्थ्यूसनामकः कश्चित् चिन्तकः "प्रतिवर्षं जनसङ्ख्या द्विगुणीभवति, किन्तु आहारोत्पादनं तथा न द्विगुणीभवति। केवलं सङ्ख्यानुक्रमेण वर्धते। तस्मात् कारणात् सङ्ख्यया वर्धमानानां जनानां कृते लप्स्यमानः आहारः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न पर्याप्तो भवति। अनेन कारणेन जीवनार्थं स्पर्धा जायते" इति त्रिंशत्वर्षपूर्वमेव जनान् जागरितवान् आसीत्। डार्विन्नाम्ना विज्ञानिना उपज्ञे विकाससिद्धान्ते दृश्यमाणस्य "अधिकःयोग्यः जीवति" इति वादस्य मूलभूतं प्रतिपादयुक्तिबीजं माल्थ्यूस्विचार एव अस्तीति सर्वे जानन्ति। जनसङ्ख्याशास्त्रमिति किञ्चन शास्त्रमेवम् अद्यत्वे जातमस्ति। तस्मिन् परिणताः "यदि जनसङ्ख्यावृद्धिः न नियन्त्र्यते, सा सर्वेणाम् राष्ट्राणं आर्थिकीः समृद्धीः गिलति" इति जागरणं दत्तवन्तः।

शिक्षणस्तरदृष्ट्या अत्यन्तनिम्नसोपाने वर्तमानानां भारतसदृशानां दरिद्राणां देशानां विषये जनसङ्ख्यावृद्धिविषयिणी भीतिः वास्तविकी प्रतिभाति। परम्पराधारितः भारतीयः समाजः बहुभिः मूढ-भावैः ग्रस्तः। अधिकसन्तानं मङ्गलकरमित्येका भावना। स्त्रीसन्तानेन लाभो नास्ति, पुत्रसन्तानेन लाभोऽस्ति, तस्मात् यावत्सङ्ख्यया अपि स्त्रीशिशवः जायेरन् नाम-पुंशिशूनां भावनायाः कारणात् अष्टसन्तानवन्तः दम्पतयः भारते न विरलाः। अस्माकं साम्प्रदायिकोऽपि अशीर्वादः "अष्टपुत्रवती भव" इत्येवम्प्रकारकः एवास्ति। सावित्रीकथा प्रसिद्धा। सा स्वयं स्त्री भवन्त्यपि शतं पुंशिशवः जायेरन् इति यमं प्रार्थयते।

मूढविश्वासस्तावदास्ताम्-व्यावहारिक्या दृष्ट्या विचार्यमाणे स्ववार्धक्ये स्वसन्तानः स्वपालनं करिष्यति इति पितृणां प्रत्याशा नवभारते बहु सन्ततियुक्तानां कुटुम्बानां अस्तित्वे हेतुः।

ऐदंविषयकः चिन्तनक्रमः आधुनिकेषु सुशिक्षितेषु किञ्चिदिव परिवर्तितो दृश्यते।

प्रथमतः नगरेषु विद्याभ्यासस्य रूप्यकमौल्यम् अधिकं सञ्जातम्। सन्तानानां विद्याभ्यासार्थं क्रियामाणस्य व्ययस्य अपेक्षया, स्ववार्धक्ये स्वसन्तानैः करिष्यमाणं पालनं महत्त्वपूर्णमिति आधुनिकाः दम्पतयः नाङ्गीकुर्वन्ति।

द्वितीयः सर्वेषामपि सुशिक्षितानां स्व-स्वभूमावेव उद्योगः लभ्यते इति वक्तुं-आधुनिके स्पर्धामये जगति-न शक्यते। स्व-स्थल एव उद्योगे लब्धेऽपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्थानान्तरणम् अधिकवेतनप्रदात्रे अन्यस्मै उद्योगाय प्रयत्नः इत्यादिकाः प्रसङ्गाः साधारणाः। यत्र यत्र वासार्थं गम्यते तत्र तत्र वसति-सौकर्यं पर्याप्तप्रमाणेन लभ्यत इति स्वप्नेऽपि चिन्तयितुं न शक्यम्। लब्धोद्योगैः कदाचित् एकाकिभिरेव उद्योगप्राप्तिमिति देशे उचितव्यं भवति। एवंस्थिते वार्धकभावं भजतां मातापितृणां पालनं पोषणं सन्तानैः क्रियत एव इति का प्रत्याशा?

तृतीयतः विवोढुम् एव अनिच्छन्तः पुरुषाः स्त्रियश्च अधिकतराः सञ्जाताः। दाम्पत्यम् एव जीवनस्य अन्तिमं प्रशस्तञ्च ध्येयम् इत्यङ्गीकर्तुमेते न सिद्धाः।

एतैः कारणैः जनसङ्ख्यावृद्धौ न्यूनता सम्भूयत्री अस्माभिर्द्रष्टुमुचिता। परन्तु भारते अद्यपि तादृशी परिस्थितिर्नास्ति! अत्र किं कारणम्?

भारतसर्वकारः "कुटुम्बकल्याणविभागः" इति नाम्ना कञ्चन विभागं उद्घाटितवान् अस्ति। तत्र सन्तानम् अनिच्छतां दम्पतीनां शास्त्रक्रियाद्वारा सन्तानोत्पादकसामर्थ्यं नाश्यते। एतदृशशास्त्रक्रियाम् इच्छतां स्त्रीणां पुरुषाणां सङ्ख्या वृद्धिं गच्छन्ती दृश्यते। तथाऽपि चीनादेशे इव अस्मद्देशे सर्वकारः जनान् अस्मिन् विषये न निर्बध्नाति। चीनादेशे तृतीयसन्तानं प्राप्तुं कस्यापि अनुमतिर्नास्ति। तृतीयसन्तानस्य शिक्षणस्य उद्योगः इत्यादिकं किमपि न दीयते, फलस्वरूपेण प्रतिदिनं भारते पञ्चषष्टिसहस्रं (६५८००) शिशवः जायन्ते।

यस्मिन् कुटुम्बे आयः न वृद्धिं गच्छति, केवलं सन्तानसंख्या वर्धते, तस्मिन् कुटुम्बे सर्वस्य सन्तानस्य शिक्षण-पालनादिकाः विचाराः समस्यामुद्भावयन्ति। देशोऽपि कश्चन कुटुम्ब एव। भारतीयाः प्रजाः सर्वाः इदं सत्यं यथा शीघ्रमवगच्छन्ति तथा भारतस्य कल्याणं साध्यते।

3.3 वरदक्षिणा

विवाहप्रसङ्गे जामात्रे श्वशुरेण दीयमाम् उपायनं यौतुकम् इति शब्देन कथ्यते। अद्यत्वे कन्नडभाषायां अस्मिनेव अर्थे वरदक्षिणा इति शब्दः रूढिं प्राप्तोऽस्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वसन्तोषेण श्वशुरः स्वसुताजामातरौ प्रति उपायनरूपेण किमपि ददाति तत्र आक्षेपणीयं नास्ति। केषुचन समाजेषु वधूदक्षिणा अपि रूढेति ज्ञायते। तस्मिन्नपि प्रसङ्गे आक्षेसुम् अवकाशो न विद्यते। किन्तु अद्यत्वे एषः साम्प्रदायिकः आचारः पैशाचिकतां प्राप्य अट्टहासं कुर्वन् समाजस्य महान् कलङ्कः सञ्जातः इत्येतत् नितरां शोचनीयम्।

विवाहात् पूर्वं वधूपितृणां च मध्ये क्रयविक्रयव्यवहारेण सदृशः वरदक्षिणा-विषयकः व्यवहारः प्रचलति। इदमत्यन्तं जुगुप्सितम्। यस्मिन् देशे विवाहो नाम पवित्रं अनुबन्धनम् इति साम्प्रदायिकः श्लाघ्यश्च दृष्टिकोणः अस्मिन्नेव देशे विवाहो नाम विपणौ सम्भवन् कश्चन व्यापारः इत्येवंरीत्या स्वस्य आकृतिं परिवर्तितवान् इतीदं दृष्ट्वा कस्य नाम चिन्तनशीलस्य मनो न दूयेत ?

मानवस्य दुराशायाः सीमैव नास्ति। वरमहाशयस्य पितरौ कन्यापित्रोः द्वारा न्यूनातिन्यूनम् एकलक्षरूप्यकाणि अपेक्षन्ते। यौ कन्यापितरौ तावद् धनं दातुं नं शक्नुतः, तयोः पुत्र्या साकं विवाहः पूर्वनिश्चितोऽपि भग्न इत्येवं निश्चयः। वरमहाशयः यथा यथाऽधिकं शिक्षितः भवति तथा तथा तस्य रूप्यकमौल्यमपि वृद्धिं गमिष्यति। अर्थात् वरः यदि कुत्रापि कायस्थः तस्य रूप्यकमौल्यं न्यूनम्। प्रौढशालाशिक्षकस्य अथवा विद्यालयाध्यापकस्य मौल्यम् अधिकतरम्। अभियन्तुः (Engineer) तथा वैद्यस्य मौल्यं अधिकतमम्।

विचित्रेष्वतिविचित्रतमं नाम कदाचिद् यदि वराः वरदक्षिणां विनैव विर्वोढुं सन्नद्धाः भवन्ति, तेन स्वपुत्रीं विवाहयितुं केचन पितरः पश्चात् पदं कुर्वन्ति। तदास्तां नाम काश्चन कन्या एवं तादृशं पतित्वेन वृणीतुं न सिद्धाः भवन्ति।

सरलया इव नाटकं कृत्वा केचन पितरः वरदक्षिणां विना स्वपुत्रं विवाहयन्ति। किन्तु विवाहानन्तरं वस्तुरूपेण भूरिः उपायनानि मातृगृहतः आनेतुं स्नुषां निर्बध्नन्ति। विवाहकाले वरदक्षिणायां दत्तायामपि विवाहानन्तरं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुनरपि धनमपेक्षमाणाः पश्यतोहराः श्वशुरा अपि न विरलाः।

पूर्वस्मिन् काले बहुविवाहपद्धतिः प्रचलिताऽसीत्। सा मूढविश्वासप्रेरिता इत्याधुनिकाः गर्हन्ति। किन्तु तथा तां पद्धतिं गर्हितुं वरदक्षिणापिशाचिकया स्नेहं कृतवताम् अमोषां कोऽपि अधिकारः नास्ति। यतः पुं-सन्तानः यदि अन्यां न लभ्यते स्म, अन्यस्मै विवाहाय पतिः प्रयतते स्म। कदाचित् पत्नी एव अस्मिन् विषये पतिम् अङ्गीकारयति स्म। पुंशिशव एव प्रशस्ताः इति मूढभावनाय तादृशाः प्रसङ्गाः अजायन्त इति एते "सुशिक्षिता" व्यङ्ग्यहास्यं कुर्वन्ति। किन्तु विवाहम् आत्मना कृत्वाऽपि, अन्यत्र कुत्रापि अधिका वरदक्षिणा लभ्यत इति ज्ञाप्यमाने, प्रथमपत्नीं त्यक्त्वा पुनरपि विवाहार्थं प्रयतमानानां सुशिक्षितानां "सभ्यं" (?) वर्तनं लज्जास्पदमित्येतेन चिन्तयन्ति।

पर्याप्तमात्रया वरदक्षिणाम् अयच्छतोः पित्रोः पुत्र्याः स्व-स्नुषायाः उपरि हिंसाप्रयोगाः हत्या इत्येकः अन्य आधुनिकसमाजस्य रोगः। सुशिक्षिताः सन्तोऽपि कथं तादृशं वर्तनमेते समर्थयन्ते इति न विद्मः।

वरदक्षिणानाम्नः पिशाचस्य उच्चाटनार्थं काश्चन सूचनाः दास्यन्ते-

१ वरदक्षिणासम्बन्धे या हिंसाऽथवा हत्या, तत्र कारणीभूतानां श्वशुरकुटुम्बीयानां मरणदण्डो विधेयः।

२ महिलानां सर्वासाम् उद्योगप्राप्तिः भवेत्।

३ "विवाहः एव प्रशस्तः" इति मूढा बालिशा च भावना अपनेतव्या। विवाहो भवेद् वा न वा स्वक्षेत्रतः समाजाय किमपि योगदानस्य दानमेव जीवनस्य उत्कृष्टः आदर्शः इति श्रद्धा जागृयात्।

४ वरदक्षिणां समर्थयमानानां सर्वेषामपि सामाजिको बहिष्कारः करणीयः।

५ "किमर्थकः मम विवहः" इति सुगम्भीरं चिन्तनम् अकृत्वा कोऽपि, अथवा काऽपि विवाहं न कुर्वीत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जैविकानां अजैविकानां वा वस्तूनां प्रभावोत्पादिका शक्तयः परिस्थितयो वा परिसरशब्देनोच्यन्ते। मनुष्यस्य परिसरो नाम उष्णोत्पादिका ऊर्जाः अपरे मनुष्याः वातावरणं इत्यादीत्यादि। तथैव समुद्रजीवानां परिसरः प्राधान्येन समुद्रं स्व-वसतेः उष्णदृष्ट्या तथा जलभारदृष्ट्या वासार्हता इत्यादीत्यादि।

परिसरमालिन्यमिति शब्दः परिसरम् अशुद्धीकुर्वन्तीः सर्वाः अपि रीतीः सूचयति। मनुष्याः धूमैः तथा याननिःसृतैरनिलैः वायुं सङ्कुरीकृत्य अशुद्धीकुर्वन्ति, रासायनिकद्रव्यैर्जलं विषमयीकुर्वन्ति, कृतकैः उद्बल्यैः मृदसस्यपोषणक्षमतां नाशयन्ति च। न केवलं एतैश्च विधानैः किन्तु अन्यैरपि मार्गैः-"प्रगति" नम्ना परिसरस्य स्वाभाविकं समतोलनं ते छिद्रीकुर्वन्ति।

परिसरस्य समतोलनमधिकृत्यापि कश्चित् प्रघट्टकः अत्रावश्यकः प्रतिभाति सजीवं किमपि वस्तु अन्यस्य तथाविधस्यैव वस्तुनः साहाय्यं विना जीवितुं न शक्नोति। गृह्यतामुदाहरणार्थम् आहारश्रृङ्खला। सौरकिरणाः प्राथमिकाहारम् उत्पादयताम् उद्भिज्जानां कृते अवश्यिकां ऊर्जा ददति। तान् उद्भिज्जान् मूषिका, हरिणा वा भक्षयन्ति। तान् पशुन् गृध्राः, सिंहा वा भक्षयन्ति। यदा ते म्रियते-सूक्ष्मा अमीजीविनः येषां देहगतानि अङ्गानि विश्लिष्य सूक्ष्मानि वस्तूनि कुर्वन्ति। तानि सूक्ष्मवस्तूनि मृदि सञ्चयं मिश्रीभवन्ति। तानि यदा सस्यैः उपयुज्यन्ते तदा पुनः आहारश्रृङ्खलायां आरम्भो भवति। इदमेव परिसरीयं समतोलनम्।

यदि मूषिकानां सङ्ख्या अत्यन्तं वृद्धिं गमिष्यति, तासां सर्वासां आहारस्य प्रदाने पर्याप्तसङ्ख्यया सस्यानां यदि च अभावः, तदा ताः म्रियन्ते-तदाश्रिताश्च गृध्रादयः। अर्थात् परिसरस्य समतोलने केनचन व्यत्यासाः प्रकृत्या एव यदा कदा जायन्ते।

किन्तु प्रकृत्या तदा यदा वा जायमानसमतोलनं न तावतीं भीतिम् उत्पादयति, यावतीं-मनुष्यैः क्रियमाणम्। तथा हि अद्यत्वे -

निर्माणकार्याणां स्थापनार्थं बह्वी भूमिरपेक्ष्यते यदर्थमरण्यानि नश्यन्ति,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अरण्यनाशे तदवलम्बिजीवनाशः स्वाभाविकः। केचन विशिष्टजातीया, गृध्राः, हरिणाः, शृगालाः, व्याघ्राः, नक्राः, घूकाः, भल्लूकाश्च नाशमुपगताः। उद्रः (otter) अतीवविरलः राज्जातः। गजानामपि स्थितिर्न तृप्तिकरी। तदास्तां नाम अरण्यानि विना मनुष्याणामेव जीवनम् आतङ्कबहुलं भवति। समुद्रात् जलात् सङ्घशः उत्पद्यमानाः मेघाः अरण्यकारणादेव शीतीभूय पुनर्जलात्मना परिणताः सन्तो वर्षयन्ति। एतान्यरण्यानि यदि न स्युः मेघानां शीतीभवनाय नावकाशः वृष्टेरपि नावकाशः। कार-यानानां निर्माणिकागारैः उत्पद्यामानो मलिनो वायुः भूमिं परितो वर्तमानस्य ओजोन्मण्डलस्योपरि दुष्परिणामं कुर्वन् ज्ञातः। ओजोन्मण्डलं नाम, सूर्यात् आगच्छतां हानिकराणां किरणानां निवारणेन जीवरक्षाकरं वायुगोलम्। तदधुना यत्र यत्र श्यानं सञ्जातम्। केषुचन प्रदेशेषु सम्पूर्णतो नष्टम्। अस्य फलत्वेन भूमिं प्रति सर्वेऽपि सौरकिरणाः साक्षादायान्ति। एतेन परिणामद्वयं जायते। प्रथमतो भूमेरुष्णम् अधिकीभवति। द्वितीयतः केषाञ्चन सौरकिरणानाम् अर्बुद-रोग-शक्ति-युक्तत्वात् जनेषु अर्बुदरोगः अधिकमात्रया उत्पद्यते।

जनसङ्ख्यावर्धनस्य कथमपि नियन्त्रणा, अरण्यनाशस्य शीघ्रातिशीघ्रं निवारणं, निर्माणिकागारैः सृज्यमानानां व्यर्थवस्तूनां यवापि कुत्रापि प्रक्षेपणं निरोद्धुं क्रमाः, प्लास्टिकजन्यवस्तूनां मृदः उपरि प्रक्षेपणस्य प्रत्यूहः-इत्यादिभिः दृढैः पदैः परिसरस्य शुद्धिः अस्माभिरासादनीया। "प्रगति" नाम्ना क्रियमाणं परिसरमालिन्यं मनुष्यस्य अस्तित्वमेव कम्प्रं-कम्प्रं करोतीति यथाऽऽधुनिको मानवो जानाति, तथा तस्यैव कल्याणम्॥

3.5 मस्तिष्कयन्त्रम्

वस्तुज्ञानस्य (information) सञ्चायकं, दायकं, निर्वाहकम् उत्पादकं च किञ्चित् स्वतश्च उपकरणं-कम्प्यूटर्, इति। (इङ्ग्लीषु भाषायाम्) केचन "गणकं" इति शब्देन यन्त्रमिदं निरूपयन्ति। किन्तु अनेन यन्त्रेण न केवलम् अङ्कानां गणना क्रियते, अपि तु विप्रकीर्णानां बहूनां कार्याणां क्षिप्रविधानं क्रियते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूर्वस्मिन् काले सर्वमपि कार्यजातं मनुष्यस्य करपादद्वारा निरुह्यते स्म। किन्तु अद्यत्वे कार्यजातस्य भूयान् भाग यन्त्रद्वारा कार्यते। अस्यां दिशि मस्तिष्कयन्त्रस्य शोध-निर्माणं महत्त्वपूर्णं दैत्यपदम्।

मस्तिष्कयन्त्रं यदा ऐदंप्राथम्येव शोधितं, तदा केवलं अङ्कगणनां कर्तुं तस्य उपयोगः समभवत्। अद्यत्वे तु न तथा। ज्ञान-विज्ञान-मनोरञ्जनात्मकान् त्रीनपि कोणान् मस्तिष्कयन्त्रं तथा व्याप्नुवदस्ति, यथा मस्तिष्कयन्त्रं विना मनुष्यस्य विचारवर्धनमेव अनूह्यं प्रतिभाति।

सागरान्तः वर्तमानानां जीवानां स्वरूपं मस्तिष्कयन्त्रं विश्लिष्य दर्शयितुं शक्नोति। नगनस्य सर्वाण्यपि अङ्गानि तेषां दोषप्रदर्शनपूर्वकं-प्रदर्श्य नेत्रवैद्यानां बहुधा उपकरोति। बाह्याकाशस्य समग्रं चित्रणं मस्तिष्कयन्त्रद्वारैव प्राप्यते। न केवलमेतावदेव-शिक्षणक्षेत्रेऽपि मस्तिष्कयन्त्रं महान्ति अद्भूतान्येव साधितवत्। प्रगतेषु राष्ट्रेषु भाषायाः विज्ञानस्य च मस्तिष्कयन्त्रद्वारा बोधनं साधारणो वृत्तान्तः अद्यत्वे पत्रिकोद्यमस्य द्वितीयं हृदयमिव संवृत्तं मस्तिष्कयन्त्रम्।

अस्माकं याः भाषाः सन्ति ताः मस्तिष्कयन्त्रं न जानाति। तस्मात् तत्कृते काचित् पृथग्भूता भाषा अन्विष्टा इत्येतं पुरातनी। आधुनिकी वार्ता तु मनुष्यस्य भाषामेव यन्त्रमेतत् यथा जानाति तथा कर्तुं कूतूहलकराः प्रयत्नाः कृताः विविधभाषाणां माध्यमेन सम्भाषणमपि कर्तुं मस्तिष्कयन्त्रं शीघ्रमेव शक्ष्यति इत्यपि विज्ञानिनाम् आशा।

मस्तिष्कयन्त्रस्य आविष्कारेण ग्रहितुमपि यथा न शक्यते तथा मुद्रणविधानं त्वरिततरं सञ्जातम्। "डाटबेस" (Database) विधानेन मुद्रणं मुद्रणार्थं वर्षद्वयमवश्यकमासीत् स ग्रन्थोऽद्य पञ्चदशदिवसावधौ मुद्राप्यते। आधुनिकाः केचन साहितीकाराः पत्राणामुपरि न लिखन्ति किन्तु डाटाबेस् विधानेन स्वग्रन्थान् स्वयमेव मुद्रयन्ते। कलाप्रपञ्चेऽपि मस्तिष्कयन्त्रस्यैव साम्राज्यम् केचन चित्रकलाविदः, सङ्गीतज्ञाश्च स्वेषां परिणतेः उन्नतान् अवकाशान् स्रष्टुं मस्तिष्कयन्त्रमवलम्बन्ते। प्रत्यग्रा वार्ता-भविष्यं कथयन्तोऽपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मस्तिष्कयन्त्रसाहाय्येन भविष्यं सूचयन्ति।

एतेन मस्तिष्कयन्त्रं भूलोके स्वर्गमेव सृजतीति न कोऽपि भ्राम्येत्। मस्तिष्कयन्त्रे सम्भवन् अल्पतमोऽपि दोषः। दोषः महतीं हानिमुत्पादयति। केभ्यश्चन वर्षेभ्यः पूर्वं परीक्षायाम् उत्तमा श्रेणी निरीक्षितवान् कश्चिद् विद्यार्थी मस्तिष्कयन्त्रस्य दोषकारणतः आत्मानम् अनुत्तीर्णं ज्ञात्वा आत्महत्यामेव अकुरुत। किञ्च शतम् उद्योगिनः यस्यां निर्माणिकायां कार्यं निर्वहन्ति तस्यां केवलम् एकेन यन्त्रेण सर्वं चेत् साध्यते, सम्बद्धाः अधिकारिणः कदाचित् तान् उद्योगिनः उद्योगात् निष्कासयन्ति। एतेन निरुद्योगसमस्या वर्धते। न केवलमेतावदेव-मस्तिष्कयन्त्रस्य प्रभावः तथा व्यापकीभूतः यथा तद्विज्ञानस्य विषये उदासीनाः पदवीधरा विद्यार्थिनः, सत्यपि तेषां बुद्धिमत्त्वे उद्योगं प्राप्तुं न शक्नुवन्ति। आधुनिके स्पर्धामये जगति मस्तिष्कयन्त्ररहितं ज्ञानसाधनम् अहितुमपि कष्टम्।

किन्तु सत्स्वपि मस्तिष्कयन्त्रैर्जायमानेषु प्राप्रसङ्गिकेषु दोषेषु-मनुष्यः भविष्यन्ती प्रगतिः एतद् यन्त्रमेवावलम्बत इत्यत्र न काऽपि संशयकणिका। प्राथमिकस्तरे जायमाना पूर्वोक्ता दोषाः क्रमेण अदृश्या भवन्तीति विज्ञानिनः अभ्यूहन्ते।

3.6 समूहमाध्यमाः

विश्वस्य परिवर्तमानानां घटनानां विषये यथासम्भवं त्वरिततरं जनेभ्यः ज्ञापयत् साधनमेव समूहमाध्यमः। राष्ट्रं राजकीयाः परिस्थितयः, विज्ञानसंशोधनम्, आर्थिकम् उच्चावचत्वम्, आरोग्यम् इत्यादिविषये जनान् एतत् साधनं बोधयति। सत्यवश्यत्वे, अन्यायमयी घटनाः विरुध्य जागरयति च।

आधुनिके जगति समूहमाध्यमः प्राधान्येन चतुर्विधः -

१. दैनिक्याः पत्रिकाः

२. नियतकालिकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. आकाशवाणी

४. दूरदर्शनं चेति।

अन्य सम्पूह-माध्यमापेक्षया वार्ताप्रकाशनाय अधिकस्थलं बिभ्राणो माध्यमः दैनिकी पत्रिका। वार्तायाः समीक्षणार्थं विमर्शार्थञ्च दैनिकीषु पत्रिकासु पर्याप्तमात्रयाऽवकाशो लभ्यते। जनाः स्वानभीष्टाः वार्ताः त्यक्तुमपि शक्नुवन्ति। वार्तापत्रिकासु अन्यदपि आनुकल्यं वर्तते यत् स्वानुकूले समये स्थले च वार्तां पठितुं जनाः शक्नुवन्ति। यदि सत्यमुच्यते दैनिकीषु पत्रिकासु वर्तमानानि कतिचन आनुकूल्यानि अन्यसमूहमाध्यमेषु न लभ्यन्ते।

नियतकालिकीषु रोचकशैल्या राजकीयवार्तानां विश्लेषणं प्राप्यते। यद्यपि काश्चन नियतकालिक्यः साहित्यप्रधानास्तथाऽपि तत्र प्रकाश्यमानेषु सम्पादकीयलेखेषु निशितया शैल्या घटनायाः कारणीभूतानां व्यक्तीनां गुण-दोषौ विचार्येते काश्चन नियतकालिक्यः केवलं वार्ताप्रधाना एव। "द वीक्" "इण्डिया टुडे" इत्यादिन्यः पत्रिकाः अत्र उदाहरणम्।

आकाशवाण्यां वार्तायाः प्रसारे, पूर्वोक्त-माध्यम-द्वयेन आसाधानीयं किञ्चित् सौलभ्यमस्ति। आकाशाण्यां वार्तां पशन्ती व्यक्तिः यदा तदा आगच्छतीः वार्ताः तत्तत्काले एव श्रोतृन् नाययति। अत्यन्तं महत्त्वपूर्णत्वेन भासमानानां वार्तानां प्रसारार्थं दैनन्दिनान् कार्यक्रमानपि स्थगयितुम् आकाशवाणी शक्नोति। उदाहरणार्थं राष्ट्रस्यास्य निर्वाचन-फलितांशस्य त्वरिततरं ज्ञापनाय सङ्गीतादिकार्यक्रमान् सर्वानपि स्थगयितुमाकाशवाणी शक्नोति। किन्तु एकमेव दौर्बल्यमाकाशवाण्यां यदस्माकमभीष्टाः वार्ताः श्रोतुं तत्रावकाशोदृष्ट्वा लभ्यते अपि च अत्यन्तं निस्तृतेन रूपेण वार्ताः ज्ञापयितुमपि न शक्यते सीमिते कालावाधौ केचनैव विषया ज्ञापनीया भवन्ति।

आकाशवाण्याम् असाध्यं कञ्चन गुणं दूरदर्शने वार्ताप्रसारः साधयति। स गुणो नाम-घटनानां साक्षात् प्रदर्शनम्। वार्तापठनदृष्ट्या आकाशवाण्यास्तथा दूरदर्शनस्य च मध्ये न किमपि अन्तरम्। किन्तु घटनाः सम्यग् ज्ञातुं दूरदर्शननीक्षकाः प्रभवन्ति। यदि घटनाः नीरसाः अमहत्त्वपूर्णाश्च, दूरदर्शनस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वार्ताः वीक्षकानां हृदयकर्षणे पराजयन्ते।

समूहमाध्यमानां मुख्यं कर्तव्यं नाम-जागतीकीनां घटनानां सत्यस्वरूपस्य क्षिप्रातिक्षिप्रं जनेभ्यः परिचायनम्। निर्वाचनसमयेषु कस्य सर्वकारस्य शासनं देशकल्याणाय प्रभवतीति स्पष्टं चित्रणं प्राप्तुं जनाः उत्कटा भवन्ति। तादृशेषु प्रसङ्गेषु राजकीयविषयिकाः परिचर्चाः समूहमाध्यमेषु स्थानं प्राप्नुवन्ति। कदाचित् स्पशवार्ताः। (Investigative reporting) समूहमाध्यमैः प्रकाशनीया भवन्ति। समाजकण्टकैः आचर्यमाणाः दुष्टक्रियाः समूहमाध्यमद्वारैव सर्वत्र विज्ञाता भवन्ति। कदाचित् सर्वकारा एव अन्याय्यमाचरन्ति, अन्याय्यकारिभ्यो रक्षणं च यच्छन्ति। तादृशेषु प्रसङ्गेषु समूहमाध्यमस्य कर्तव्यभारो महान्।

सर्वे जना नीतिमन्त इति वक्तुं न शक्यते। सामाजिक्योऽपि बह्व्यः पीडाः निवारयितुमपि समूहमाध्यमाः प्रयतेरन्। उदाहरणार्थम् उत्कोचः, वरदक्षिणा इत्यादित्यादि। अर्थात् समाजहितसाधकानाम् अभिप्रायाणां सृजनमपि समूहमाध्यमस्य ध्येयेष्वन्तर्भवति।

एतैः कर्तव्यभारैः समुपेतत्वात् समूहमाध्यमे कार्यं निर्वहन्तः, उद्योगिनः सदा उन्नतविचारधारापूर्णान्तःकरणा भवेयुः। यदि त एव प्रशस्ताः रीतीः त्यक्त्वा वक्रपन्थानमाश्रयन्ते, तदा समूहमाध्यमस्य दुरुपयोगो भवति, समाजोपरि च अनभीष्टः क्षुद्रः प्रभावो जायते।

"कस्मिन्नपि सर्वकारे पक्षपातम् अकृत्वा, समाजस्य कल्याणमेव चिन्तयन्तः समूहमाध्यमाः आधुनिकविश्वस्य जीवनाडी" इत्युक्ते अतिशयोक्तिर्न स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

NOTES :

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घटकः-४

प्रबन्धः तस्य रचना च

4.1 भूमिका

4.2 शिष्टाचारः

4.3 स्त्री-शिक्षा

4.4 समाचार-पत्राणि

4.5 लेखनाभ्यासाय केचन प्रबन्धाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घटकः-४

प्रबन्धः तस्य रचना च

4.1 भूमिका

प्रसिद्धस्य अथवा प्रसिद्धीभवितुं योग्यस्य वस्तुनः प्रशस्तया रीत्या प्रकुष्टं मार्गमाश्रित्य प्र-चारस्यार्थे लेखनस्वरूपेण प्र-युक्तं बन्धनमेव प्र-बन्धः। एषः शब्दः किमपि वस्तु अधिकृत्य सरलया स्पष्टया च गद्यशैल्या लिखितं विचारखण्डम् अन्वेति। केवलं संवादेन येऽशाः न स्पष्टा भवन्ति ते सर्वे प्रबन्धरचनायां स्पष्टा भवन्ति। न केवलमेतावदेव प्रबन्धैः वयम् अस्माकं हृद्गतान् प्रौढान् विचारान् अन्येभ्यः सम्यग्ज्ञापयितुं शक्नुमः। स्पष्टतरं लेखनार्थं किञ्चित् कौशल्यमपेक्षितं, तच्च कौशल्यम् आसादयितुं श्रद्धापूर्वकोऽभ्यासः अवश्यकः।

वस्तुनः वरणं प्रबन्धरचनायै करणीयः प्राथमिकः स्तरः। अस्माकं कुतूहलप्रदान् तथा ज्ञातान् विषयान् श्रुत्वा प्रबन्धं लिखितुं शक्यते। अतीव विस्तृतान् वादांशात् अपेक्षमाणं वस्तु त्यक्त्वा, प्रबन्धशरीर-प्रमाणापेक्षया केवलम् अल्पावकाशम् अपेक्षमाणं च वस्तु त्यक्त्वा प्रबन्धस्य विस्तारं नानाविधैः दृक्कोणैः व्याप्नुवत् वस्तु प्रबन्धरचनावसरे ग्राह्यं भवति।

प्रबन्धरचनातः प्राक् प्रतिपाद्यानां विषयानां काचन स्थूला पट्टिका निर्मातव्या। एषा पट्टिका रूपरेखेत्युच्यते। अस्यां च रूपरेखायां प्रबन्धे विशदीकर्तुमभीष्टानां मुख्यानां सामग्रीणां नामानि लिख्येरन्। नामलेखनान्तरं तेषां विषयानुगुण्येन वर्गीकरणं विधेयम्। अस्य वर्गीकरणस्य अधिकं प्रयोजनं प्राप्तुं मुख्यविषयाः प्राथमिकाः करणीयाः गौणविषयाश्च द्वैतीयीकाः। विषयाणां पट्टिका लघुभिः वाक्यैर्वाक्यखण्डैः कर्तुं शक्यतेऽथवा पदैः कर्तुं शक्यते। एवं रूपरेखारचनायाः प्रयोजनमेतदेव यत् मुख्य-प्रतिपाद्य-विचारे किञ्चित् स्पष्टं चित्रणं प्रबन्धकृतो मनसि सन्तिष्ठते। यदि कांश्चन व्यत्यासान् कर्तुं प्रबन्धकृदपेक्षते, रूपरेख-रचना-समय एव तत् शक्यते कर्तुम्। एतेन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रबन्धरचनाकाले एव क्रियमाणैः व्यत्यासैः सम्भवतः कालापव्ययस्य अवकाशो नोत्पद्यते।

न कोऽपि प्रबन्धकृत् स्वीये प्रबन्धे प्रबन्ध-प्रतिपाद्यवस्तु अधिकृत्य समग्ररूपेण प्रतिपादयितुं शक्नोति। किन्तु प्रबन्धकृतो मनसि-प्रबन्धपरिमाणं यावद् वर्तते-तावत्येव अवकाशे यथाशक्ति विषयान् सङ्ग्रहीतुं व्यवस्थितेन रूपेण च स्थापयितुं कुतूहलं वर्तते।

प्रबन्धस्य प्रारम्भे सामान्योक्तिं, प्रसिद्धं वा कञ्चन श्लोकमुपन्यस्य नानादृष्टिभिस्तस्य प्रतिपादनं कर्तुं शक्यते। यदि किञ्चन सजीवं निर्जीवं वा दृश्यं वस्तु प्रबन्धस्य प्रतिपाद्यं भवति, प्रथमे पीठिकारूपे प्रघट्टके एव तस्य स्वरूपवर्णनं करणीयम्। ततस्तस्य "उपयोगः अथवा दुरुपयोगः" इत्यादिकम्। सामाजिकीनां समस्यानां विषये प्रबन्धलेखनमधिकमवधानमपेक्षते।

प्रबन्धवाक्यानि सरलानि स्पष्टानि तथा विषयस्य साक्षात् प्रतिपादकानि च स्युः। केवलं पाठकानां कृते प्रबन्धा रच्यन्ते इति विचारं प्रबन्धकृत् कदाऽपि न विस्मरेत्। अर्थात् विषयस्य बोधनार्थं प्रबन्धरचना न तु स्वपाण्डित्यप्रदर्शनार्थम्।

प्रसिद्धानाम् उक्तीनां उद्धृतयः यथाऽल्पाः तथा साधु। उद्धृतव्यो यथा यथाऽधिका जायन्ते तथा तथा प्रबन्धस्य स्वीयत्वं नश्यति, पाठकानां पठनकुतूहलं न्यूनीभवति, प्रबन्धः केवलं प्रसिद्धोक्तीनां सङ्कलनञ्च जायते।

ज्ञातानां वस्तूनामपि विषयेऽप्रसिद्धा बहवः दृक्कोणाः सन्ति। ते न विस्मरणीयाः। यथासम्भवं हास्योक्तीनां सन्निवेशः प्रबन्धस्य विषये पाठकानाम् अभिरुचिं वर्धयति।

प्रबन्धस्य शीर्षकत्वेन यन्नाम दीयते, तस्य सम्पूर्णतो न्यायदानं कर्तुं प्रबन्धकृताऽवहितमतिना भाव्यम्। अन्यथा प्रबन्धशीर्षकस्य तथा प्रबन्धशरीरस्य च मध्ये कोऽपि सबन्धो न स्थास्यति।

प्रबन्धरचनाभ्यासः नव-नव विचाराणां निरूपणाय उत्कृष्टानि ज्ञानद्वाराण्युद्घाटयति। अद्यत्वे नवीना विज्ञानविभागा एव जायमानाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वेषामस्माकं दृश्यन्ते। एतादृश्यां परिस्थितौ पुस्तकानां रचनावेगः कियानपि स्यान्नाम, न पर्याप्तः। तस्मात्, यस्मिन्क कस्मिन्नपि क्षेत्रे पुस्तकानां रचनायाः प्राक् प्रबन्धरचनाभ्यासः सर्वेषमपि सुशिक्षितानां कृते अत्यन्तमावश्यकः प्रतिभाति।

4.2 शिष्टाचारः

सुशिक्षिताः सभ्याः सदाचार-सम्पन्नाश्च जनाः 'शिष्टा' इति कथ्यन्ते। तेषामेव आचारः-व्यवहारः - शिष्टाचार इति पदेन व्यवह्रियते। अर्थात् शिष्टजनाः गमने आगमने, उत्थाने उपवेशने, शयने जागरणे, आदाने प्रदाने, भोजने, पाने, आलापे संलापे, प्रश्नेसमाधाने, हासे परिहासे, हर्षे, विषादे संपत्तौ विपत्तौ, आमोदे, वादे प्रतिवादे, केलौ कुतूहले, घाते प्रतिघाते, जये पराजये, अनुरागे विरागे, उत्कर्षे अपकर्षे, पुरस्कारे तिरस्कारे, उपकारे अपकारे, प्रणामे आशीर्वादे, पुरीषे प्रस्रावे, तथा अन्येषु च लघुषु महत्सु वा कार्येषु यथा आचरन्ति यथा च व्यवहरन्ति स एव आचारो व्यवहारश्च शिष्टाचार इति उच्यते।

सुख-सम्मान-पूर्वकं स्वकीयं जीवनं यापयितुं शिष्टाचार-पालनस्य अतीव आवश्यकता भवति। ये जनाः शिष्टाचार-विरुद्धम् आचरन्ति, उचितं करोमि अनुचितं वा इति विषये ध्यानं न ददते, युक्ताऽयुक्ताविवेकं विहाय यथेच्छं व्यवहरन्ति ते सभ्य-समाजे कुत्रापि समादरं न लभन्ते। एतादृशेषु जनेषु स्वकीया अथवा सर्वे एव जना घृणां कुर्वन्ति, सर्वे एव निन्दन्ति, सर्वे एव च तेषाम् असहयोगं कुर्वीन्ते। एतद्विपरीतं ये जनाः शिष्टाचारानुसारं सर्वदा आचरन्ति, उचिताऽनुचिते विचार्य व्यवहरन्ति ते शिष्टसमाजे सदैव सम्मानं प्राप्नुवन्ति सर्वत्रैव च समाद्रियन्ते। ते सर्वे अपि समाजेषु सादरम् आहूयन्ते। नरो नारी, बालको वृद्धो, वा सर्वे एव गृहे बहिर्वा शिष्टजनसम्मतेन व्यवहारेणैव समाजे सम्मानयोग्या भवन्ति न अन्यथा। अतः सर्वैरेव नरैः नारीभिर्वा शिष्टाचारानुकूल एव व्यवहारः कर्तव्यो येनन समाजे सुख-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्मान-पूर्वकं जीवनं यापयितुं शक्येत।

समाजे बहवो जनाः अनेकानि शिष्टाचार-विरुद्धानि कार्याणि कुर्वन्ति। बहूनां निरर्थकमेव गालि-प्रदानस्य अभ्यासो भवति। ते साधारणे वार्तालापे हासे-परिहासे च पदे पदे उद्वेगजनकान् अपशब्दान् उच्चारयन्ति। बहवो यत्रैव भुञ्जते तत्रैव गराडूषादिकं कुर्वते। अनेके आज्ञां विनापि परवस्तूनि गृह्णन्ति। न च पुनः प्रेरणां विना पुनः परावर्तयन्ति। केचन वा न क्रियते तर्हि तदेव दुःखकारणमपि भवितुमर्हति। पूर्वं जना धर्मपूर्वकं धनोपार्जनं कुर्वन्ति स्म। परं सम्प्रति जना धनोपार्जने धनस्य अधर्मस्य वा ध्यानं न कुर्वन्ति। येन केनापि उपायेन धनार्जने प्रवृत्ताः सन्ति। लुण्ठेन चौर्येण, वञ्चनेन उत्कोचग्रहणेन, असत्यभाषणेन, भयप्रदर्शनेन, विश्वासघातेन, दायापहरणेन च स्वार्थं साधयन्तो जना दृश्यन्ते। राजसेवायां, भृतिकर्मणि, वाणिज्ये वा सर्वत्रैव भ्रष्टाचारस्य साम्राज्यं दृष्टिपथमायाति। अत एव परस्परं घृणा अशान्तिः असन्तोषः उपद्रवः कलहः कोलाहलो युद्धं च दिने दिने वर्द्धमान विलोक्यते। अतो धर्मानुसारमेव सर्वैः धनोपार्जनं कर्तव्यमिति भारतीयसंस्कृतेः सिद्धान्तः अस्ति।

यथा धनोपार्जने तथैव धनस्य उपभोगेऽपि ध्यानदानस्य आवश्यकता अस्ति। धनस्य हि द्विविधरूपेण सदुपयोगो भवति। भोगेन दानेन च। बहवो जना धनम् उपार्जयन्ति परं न तस्य उपभोगं कुर्वन्ति नापि दानमेव ददते। ते न कदाचित् शोभनं वस्त्रं दधते न च समीचीनम् अन्नमेव भुञ्जते। प्रभूत धनं रक्षित्वाऽपि दुःखेनैव दिनानि यापयन्ति। एतादृशेषु ते दानमपि न किञ्चित् कुर्वते। भिक्षुकं दृष्ट्वा दूरादेव आननं भृकुटी कुटिलं विदधति। साधून् दृष्ट्वा विलीयन्ते। सामाजिके हितकार्येऽपि एकं पणं व्ययीकर्तुं न अभिलषन्ति। एवम्भूता अनेके जना ग्रामे ग्रामे सन्ति। परन्तु अयं शास्त्रीयः पन्था नास्ति, धनस्य समुचितो व्यवहारो नास्ति। यदि धनं भवेत् तर्हि तस्य सम्यक् उपभोगः कर्तव्यः सत्पात्रे च दानं कर्तव्यम्। सामाजिकेषु कार्येषु अपि यथासम्भवं सहायता कर्तव्या। दुःखस्यायं विषयो वर्तते यत् बहवो धनस्य महत् दुरुपयोगमपि कुर्वन्ति। समाजे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईदृशानामपि जनानां न्यूनता नास्ति। जनाः सत्कार्ये तु धनं न व्ययीकुर्वन्ति परन्तु असत्कार्येषु मुक्ताहस्ता भवन्ति। मादकद्रव्यासेवने, असत्पात्रदाने, द्यूतक्रीड़ायां, गणिकानृत्यकर्मणि, पाखण्डिजनसत्कारे, व्यभिचारे च प्रायः एतादृशा जना धनस्य विनाशं कुर्वन्ति। एवं प्रकारेण, न जानीमः, कियतो धनस्य प्रतिवर्षं विनाशो भवति। भारतवर्षस्य दुःखकारणेषु दरिद्रतायाञ्च अयमपि एको महान् हेतुरस्ति। अतः तथा अस्माभिः प्रयत्नो विधेयो यथा कोऽपि अनुचितेषु कार्येषु धनस्य उपयोगं कर्तुं न पारयेत्। यदि च कुर्यात् तर्हि तस्मै सामाजिको दण्डो दीयेत। एवं च ये धनानि रक्षित्वा तस्य केवलं सञ्चयमेव कुर्वन्ति न भोगं न च दानम्, तेऽपि भोगाय दानाय च प्रेरणीयाः। एवं प्रकारेण यदा धनस्य उपार्जनम् उपभोगो व्ययश्च समुचितरूपेण भविष्यति तदैव अस्माकं कल्याणं भविष्यति देशस्य चेति मत्वा सर्वैरेव अस्यां दिशि पूर्णरूपेण ध्यानं देयम्।

4.3 स्त्री-शिक्षा

समाजस्य हिताय पुरुषाणां मध्ये शिक्षाप्रसारस्य आवश्यकता वर्तते तथैव स्त्रीणामपि। यदि केवलं पुरुषा एव शिक्षिता भवेयुः स्त्रियश्च अशिक्षिताः तदा न तु तयोः जीवनं सुखमयं भवितुमर्हति न च समाजस्य हितमेव। अतः पुरुषाणामिव स्त्रीणां शिक्षणस्यापि महती आवश्यकता वर्तते।

गृहस्थाश्रमः चतुर्षु अपि आश्रमेषु श्रेष्ठो मन्यते। स च पुरुषाणां स्त्रीणाञ्च सम्मिलितेन सहयोगेन, पारस्परिकेण प्रेम्णा, अभिन्नेन ऐकमत्येन च समीचीनतया चलति। परन्तु यदा पुरुषः शिक्षितो भवति स्त्री च अशिक्षिता तदा न तयोः स्त्रीपुरुषयोः सर्वेषु कार्येषु परस्परं सहयोगो जायते, न परस्परं प्रीतिः तिष्ठति, नापि विचारेषु ऐकमत्यमेव भवति। उभौ अपि प्रायेण भिन्नकर्माणौ भिन्नभिन्नविचारौ भिन्नव्यवहारौ च भवतः। अतः उभयोरपि जीवनं सुखमयं सन्तोषमयञ्च न भवति। अस्मिन् रथः एकस्य चक्रस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

समीचीनत्वेऽपि अपरस्य चक्रस्य दुष्टतया सम्यक् न चलितुं शक्नोति तथैव गार्हस्थ्य-जीवनमपि एकस्य शिक्षितत्वे अपि अपरस्य अशिक्षिततया पूर्णरूपेण आनन्दमयं न भवति। परन्तु यदा उभौ अपि शिक्षितौ भवतः तदा इयं दशा न भवति। अतो यथा वयं स्वपुत्राणां शिक्षायै प्रयत्नं कुर्मः पुत्रीणामपि शिक्षाया उपरि ध्यानं दातव्यम्। तदैव दम्पत्योः परिवारस्य समाजस्य च यथेष्टं हितं भविष्यति। अत एव शास्त्रेषु लिखितं वर्तते यत्-

कन्याऽप्येवं लालनीया शिक्षणीया प्रयत्नतः। [महानिर्वाणतन्त्रम्]

स्त्रीणां शिक्षाया विषये अस्माकं समाजे परस्परविरोधिनौ द्विविधौ विचारौ चलतः। ये नवीन-शिक्षा-दीक्षा-सम्पन्ना जनाः पाश्चात्यशिक्षाया अनुकरणं कुर्वन्ति ते स्वकीयाभ्यो बालिकाभ्यो न केवलं साधारणीमेव प्रत्युत महतो गहीयसीं शिक्षां दातुमिच्छन्ति। तेषाम् अयं विचारो वर्तते यत् यथा पुरुषा उच्चशिक्षां लब्ध्वा राजकीयकार्येषु अन्येषु वा कार्यक्षेत्रेषु उच्चपदानि लभन्ते तथैव उच्चशिक्षां लब्ध्वा स्त्रीसमाजेनापि उच्चपदानि लब्धुं शक्यन्ते। अतः स्त्रीणामपि कृते तादृश्याः उच्चशिक्षायाः प्रबन्धः कर्तव्यो येन ताः पुरुषैः सह प्रतियोगितां कर्तुं शक्नुयुः, पुरुषा इव च उच्चादुच्चतरेषु पदेषु कार्यं कर्तुं शक्नुयुः। तदैव अस्माकं देशस्य सम्यक् प्रकारेण समुन्नतिः भविष्यति। तदैव च वयं पाश्चात्यदेशानां समानतां कर्तुं शक्ष्यामः।

केचन प्राचीना जना एवं कथयन्ति-का नाम आवश्यकता वर्तते स्त्रीणां शिक्षायाः। अन्यत् किल कार्यक्षेत्रं पुरुषाणाम् अन्यच्च स्त्रीणाम्। नहि पुरुषवत् स्त्रीणामपि सेनासु न्यायालयेषु औषधालयेषु वा कार्यालयेषु कार्यकरणस्य आवश्यकता वर्तते। नहि एतदर्थं स्त्रियो निर्मिता विधिना। एतासां कार्यक्षेत्रं तु स्वकीयं गृहमेव अस्ति। गृह-संशोधनम्, पात्राणां मार्जनम्, पाक-निर्माणम्, धान्यादीनां कण्डनम्, कुट्टनं, पेषणम्, प्रस्फोटनम् गालनम्, उत्पत्रनम्, फलीकरणम्, शिशुपालनम्, पतिसेवा, श्वश्रूश्वशुरयोः शुश्रूषा, आवश्यकवस्तु-संग्रहश्च इत्यादिनि तासां कार्याणि सन्ति। अतो नहि स्त्रीणां कृते कांचित् शिक्षाया आवश्यकता वर्तते। शिक्षया स्त्रीणां समाजस्य वा कश्चित् लाभो नास्ति प्रत्युत हानिरेव अस्ति इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवमेव अस्मिन् विषये लेख-व्याख्यानादिषु द्विविधौ विचारौ वयं पश्यामः। परन्तु इमौ उभौ अपि विचारौ प्रायेण दोषपूर्णौ। ये पुरुषा एतद सर्वासां स्त्रीणां कृते उच्चशिक्षायाः पक्षं समर्थयन्ति तेऽपि अनुचितं कुर्वन्ति। यतो हि उच्चशिक्षां लब्ध्वा सत्यमेव स्त्रियो गृहकार्यकरणात् विरक्ता जायन्ते। न ताभ्यो रसवती-निर्माणं रोचते नापि शिशूनां लालनपालनमेव। का पुनः वार्ता अन्यकार्याणाम्। पुरुष इव ता अपि इतस्ततो भ्रमणे, सभा-सम्मेलनादिषु गमने, सततं पुस्तकपत्राद्यवलोकने, येन केनापि वा सह सम्भाषणे एव रुचिं दधते। अतो गृहकार्य-सञ्चालने काठिन्यम् आयाति। अन्यस्य च कस्यचित् भृत्यस्य भत्याया वा उपरि सर्वोऽपि गृह-कार्यभारो देयो भवति। अन्यच्च दाम्पत्यसुखमपि प्रायेण उच्चशिक्षाया दानेन विलुप्तं भवति। पिता बम्बईनगरे अध्यापयति पत्नी च कालिकात्तायाम्। यस्मिन् समये बम्बईनगरे पत्युः शिरसि वेदना जायते तस्मिन् समये पत्नी कालिकात्तायां कन्दुक-क्रीडन पाराणा तिष्ठति। कार्यालयात् निवासस्थानमागत्य पतिः भृत्यादिना परिश्रमम् अपनोदयति पत्नी च कुक्कुरलालनेन मनो विनोदयति। आजीवनं पृथग् निवासेन कदापि तौ पूर्णं सहवाससुखं नानुभवतः। अतः पारिवारिक-सुख-दृष्ट्या स्त्रीणां कृते उच्चशिक्षाया विशेषावश्यकता न प्रतिभाति। यद्यपि प्राचीनकाले गार्गी-मैत्रेयी-प्रभृतयः कतिपया आर्यमहिला आसन्नेव विशिष्ट-योग्यतासम्पन्नाः, परं साधारणतया उच्चशिक्षायाः प्रचारेण कश्चित् लाभो दृष्टिगोचरो न भवति।

ये च केचन पुराणाः पुरुषाः सर्वथा एव स्त्रीणां कृते शिक्षाया निषेधं कुर्वन्ति, अशिक्षिता एव च ता रक्षितुम् इच्छन्ति तेषामपि विचारो भ्रान्त एवास्ति। यतो हि शिक्षाया अभावेनैव स्त्रीषु अनेके दोषा अपि दृश्यन्ते। कस्याम् ऋतौ किं वस्तु स्वास्थकरं किं च अस्वास्थ्यकरम् इति तासां ज्ञानं न भवति। अन्धविश्वासस्य भ्रान्तधारणायाः मूढाग्रहस्य च ता भाण्डागाराणि एव भवन्ति। सर्वदैव विवदन्ते, प्रतिक्षणं कलहायन्ते, पदे-पदे शपथं कुर्वन्ति, मुहुर्मुहुश्च अश्लीलशब्दान् उच्चारयन्त्योऽपि न संकुचन्ति न च लज्जन्ते। शिक्षां विनैव ताः देशकालयोः वर्तमानपरिस्थितेः सर्वथा अपरिचिता भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनेन कारण-समुदायेन स्त्रीणां शिक्ष तु "ननुनच" करणस्य कांचित् आवश्यकतैव नास्ति। परं कीदृशी शिक्षा देया इति विषयस्तु अवश्यमेव विचारणीयो वर्तमानसमये। पाश्चात्यदेशानाम् आदर्शानुसारं या शिक्षा प्रचाल्यमाना अस्ति सा तु निःसंशयमेव हानिकरी वर्तते स्त्रीणां कृते। न अनया शिक्षया स्त्रीषु भारतीया आदर्शा एव आगन्तुं शक्नुवन्ति, नापि ता गृहकार्यकुशला एव भवितुमर्हन्ति। अतो वर्तमानशिक्षापद्धतौ परिवर्तनं विधाय स्त्रीणां कृते तथाविधायाः शिक्षायाः प्रबन्धः कर्तव्यो यथा ता इतिहास-भूगोल-गणित-स्वास्थ्यादिविषयैः सह पारिवारिकीमपि शिक्षां प्राप्नुयुः। अन्यभाषाभिः सह तासां कृते साधारणी संस्कृतभाषाया अपि शिक्षा देया येन शास्त्रपुराणादीनां पठनेन स्तुति-प्रार्थना-पूजादिना च भारतीयसभ्यतायाः संरक्षणां प्रचारं चापि कर्तुं शक्नुयुः। सहैव पाकविद्याया धात्रीविद्यायाः सीवनादिललितकलायाः कृषिविद्यायाश्च शिक्षणं कर्तव्यं येन गृहकार्यसञ्चालनेऽपि ताः सुविचक्षणा भवेयुः। प्रत्येककन्यायै एतादृशी शिक्षा देया येन सा आदर्शभगिनी आदर्शगृहिणी आदर्शजननी च संपद्येत। एतादृशी एव स्त्रीशिक्षा स्त्रीणां पुरुषाणां परिवारस्य समाजस्य राष्ट्रस्य च कृते हितावहा कल्याणाकरी च भवितुमर्हति। अतः सम्प्रति तथा प्रयत्नः कर्तव्यो येन सर्वत्रैव स्त्रीशिक्षायाः प्रचारः स्यात् स्त्रियश्च शिक्षिताः सत्यो गृहस्य राष्ट्रस्य च भूषणानि भवेयुः।

धार्मिकेषु विषयेषु अपि तासां सर्वथा भ्रान्तमेव ज्ञानं वर्तते। अधर्ममेव धर्मं मन्यमानाः ताः पदे पदे धूर्तजनैः पाखण्डिभिश्च वञ्चिता भवन्ति। एवं च शिक्षां विना प्रायेण तासाम् अभद्रमेव रूपम्, अभद्रा एव वाच, अभद्र एव व्यवहारः, विपरीता एव च विचारा भवन्ति। एभिश्च दोषैः न केवलं ता आत्मानमेव दूषयन्ति अपि तु समाजमपि। अतः स्त्रीशिक्षायाः प्रचारः सर्वथा परमावश्यक इत्यत्र नास्ति सन्देहावसरः। अशिक्षिताः स्त्रियो बालक-बालिकादीनामपि अशिक्षायां कारणानि भवन्ति। यतो हि माता एव प्रथमो गुरुर्भवति बालकबालिकानाम्। तासां क्रोड एव च प्रथमा पाठशाला। अस्यामेव पाठशालायां प्राथमिकी शिक्षा मिलति सर्वेभ्यो मानवेभ्यः। परं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदा अशिक्षिता मातरो भवन्ति तदा न ता बालकेभ्यः शिक्षां दातुं शक्नुवन्ति, न वा सत्पथे एव तान् प्रवर्तयितुं क्षमन्ते। प्रत्युत मातुरेव दोषेण तेऽपि दूषितस्वभावा असन्मार्गगामिनो दुराचाराश्च जायन्ते। एतद्विपरीतं तु या मातरः शिक्षिता भवन्ति ता निजसन्ततीः शैशवादेव शिक्षयन्ति, सदाचारान् उपदिशन्ति, सत्पथे प्रवर्तयन्ति, दुरभ्यासान् दूरीकुर्वन्ति, महापुरुषाणां च चरितानि श्रावयित्वा तेषु सच्चरित्रताया महत्त्वस्य च भावं भरन्ति। एतादृशा एव च बालका अग्रो गत्वा समाजस्य आदर्शपुरुषा भवन्ति।

4.4 समाचार-पत्राणि

वैज्ञानिके अस्मिन् युगे ज्ञानप्रसाराय यानि यानि साधनानि आविष्कृतानि सन्ति तेषु समाचारपत्राणामपि प्रधानं स्थानं वर्तते। कस्याऽपि ज्ञातव्ययिषयस्य अल्पीयसा कालेन व्यापकः प्रचारो यथा समाचारपत्रद्वारा कर्तुं शक्यते न तथा केनापि उपायेन। अत एव ज्ञानविस्तारक्षेत्रे समाचारपत्राणां महती उपयोगिता वर्तते।

समाचारपत्राणां जन्मकथा अतिपुरातनी नास्ति। अस्मिन् विषये प्रकाशितानां कतिपयलेखानाम् अवलोकनेन ज्ञायते यत् सर्वप्रथमं क्रिस्ताब्दस्य एकादशे शतके चीनादेशे एतादृशं पत्रं प्रकाशितं बभूव। मुगलशासन-समये भारतवर्षेऽपि हस्तलिखितं संवादपत्रं प्रचलति स्म परं तत् केवलं शासनविभागे एव सीमितम् आसीत्। यूरोपे तु सवग्रि समाचारपत्रस्य प्रादुर्भावः इटलीराज्यस्य "वेनिश" नगरे अभूत्। ततः परं जर्मनीदेशे तत्पश्चात् च इंग्लेण्डे समाचारपत्रस्य प्रकाशनं प्रारब्धम्। अनन्तरं गौराङ्गेषु समागतेषु भारतवर्षेऽपि समाचारपत्राणां प्रचलनम् अभवत्। श्रूयते "समाचारदर्पण" नामकं पत्रं सर्वप्रथमं प्रचलितम् ततश्च शनैः शनैः अन्यानि पत्राणि प्रचलितानि। इदानीं तु भारतवर्षे एव प्रतिदिनं एतावन्ति पत्राणि प्रकाशितानि भवन्ति येषां संख्या काठिन्येन कर्तुं शक्यते। इदानीं निखिलमपि भूमण्डलं समाचारपत्रैः परिव्याप्तं वर्तते।

पत्राणि अपि दैनिक-साप्ताहिक-पक्षिक-मासिक-षाण्मासिक-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वार्षिकादिभेदेन विषयभेदेन च अनेकप्रकाराणि सन्ति। एषां मध्ये दैनिकेषु साप्ताहिकेषु च पत्रेषु विशेषरूपेण समाचारा एव प्रकाशिता भवन्ति परं मासिकादिषु पत्रेषु तु बाहुल्येन विभिन्नविषयेषु निबन्ध-प्रबन्धा एव प्रकाश्यन्ते।

वर्तमानयुगे इमानि पत्राणि मानवसमाजस्य यावतः उपकारान् कुर्वन्ति तेषाम् इयत्ता नास्ति। बाल्यकाले ये जनाः पूर्णशिक्षां न लब्धवन्तः तेऽपि समाचारपत्राणां प्रतिदिनं पठनेन अनेकविषयाणां ज्ञानं लब्धुं शक्नुवन्ति। तथैव पूर्णशिक्षितानामपि कृते पत्राणां लिखितानां प्रबन्धानां पठनम्, नानाविधानां चित्राणां निरीक्षणम्, सामयिकपरिस्थिति-परिज्ञानम्, प्रकाशितानां प्रकाश्यमानानाञ्च नूतन-नूतनानां ग्रन्थानां पत्रपत्रिकादीनाञ्च परिचयः, विविध सिद्धान्तानामध्ययनम्, मनोरञ्जनैर्लेखैः मनोविनोदनम्, स्वाभिप्रायप्रकाशने सौविध्यम्, परस्परं विचाराणां विनिमयश्चेत्यादयः अनेके लाभाः सन्ति। समाचारज्ञानातिरिक्तं पत्र-पत्रिकादीनां पठनेन असंख्यानां नित्यप्रयोजनीय-विषयाणां सम्बन्धे ज्ञानं जायते। यथा-राजनीतिः, समाजनीतिः, धर्मः, दर्शनम्, स्वास्थ्यम्, साहित्यम्, इतिहासः, भूगोलः, आयुर्वेदः, क्रीडाकौतुकादिकम्, वाणिज्यम्, विज्ञानञ्च। एषु विषयेषु यादृशा महत्त्वपूर्णाः सारगर्भिता लेखा आलोचना वा पत्रपत्रिकादिषु निःसरन्ति तेषाञ्च पठनेन यादृशं ज्ञानं जायते तत् अन्यसाधनैः सर्वथा असाध्यं वर्तते। अतो विद्याया उन्नतौ ज्ञानस्य प्रचारे च अवर्णनीया उपकारिता पत्राणाम्।

शासनविषयेऽपि पत्राणि इमानि महत् साहाय्यं कुर्वते। शासनविभागतो या काचन नवीना व्यवस्था धारा वा जनतायाः कृते निर्मिता भवति तस्याः पत्राद्धारा एव जनतायां प्रचारः क्रियते। अनेन उपायेन जनताऽपि शीघ्रमेव राजकीयां व्यवस्थाम् औदेशं वा ज्ञात्वा तदनुकूलम् आचरति। अथ च यदा कस्मिंश्चित् विवादास्पदे विषये लोकजनताया मतामत-परिज्ञानस्य आवश्यकता भवति तदानीमपि समाचारपत्राणि महत् साहाय्यं कुर्वन्ति। एतदतिरिक्तम्-यदा केचन शासनाधिकारिणो यथेच्छमाचरन्ति, अनुचितं कुर्वन्ति, अन्यायम् अत्याचारं वा विदधति तदा पत्राण्येव समालोचना-द्वारा जनमत-प्रकाशनद्वारा च तेषां नियन्त्रणे दोषदूरीकरणे च समर्थानि भवन्ति। एवमेव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्यापारक्षेत्रेऽपि अनेकविधा उपयोगिता वर्तते पत्राणाम्।

परन्तु यथा संसारस्य किमपि वस्तु सर्वथा निर्दोषं नास्ति तथैव पत्राणि अपि सर्वथा दोषरहितानि न सन्ति। अतः उपकारस्थाने यदाकदाचित् अपकारमपि जनयन्ति। मिथ्यासमाचारणां प्रकाशनेन भ्रान्तिजननम्, पक्षपातपूर्णलेखानां प्रचारेण पारस्परिक-विद्वेष-वर्द्धनम्, ईर्ष्याद्वेषमयीभिः समालोचनाभिः साहित्यिकक्षेत्रे कटुतायां उत्पादनम्, अश्लीलविज्ञापनानां प्रकाशनेन समाजे नैतिकताया अधःपातनञ्चेत्यादयः पत्रपत्रिकादीनां कतिपये दोषाः सन्ति। यदि इमे दोषा न स्युः यदि च सम्पादकमहाभागा निर्दोष-सम्पादने समधिकं ध्यानं दद्युस्तदा पत्रादिभिर्यथा जगतो महीयान् उपकारः कर्तुं शक्यते न तथा अन्येन उपायेन इत्यत्र नास्ति सन्देहलेशोऽपि।

एवं निर्विवादं सिद्धेऽपि पत्राणामुपयोगित्वे यथा एतेषां सुन्दरं प्रकाशनं यथा व्यापकः प्रचारो यथा च सम्पादकानां लेखकानां च आर्थिकी अवस्था अपेक्ष्यते तथा नास्ति। परन्तु अवसानं गता सम्प्रति अस्माकं परतन्त्रतायाः कशला कालरात्रिः। समागता च स्वातन्त्र्यसूर्योदयवेला। तद् आशास्महे यत् स्वतन्त्रे भारते यथा अन्यक्षेत्रेषु समुन्नतिः विधास्यते तथैव पत्रपत्रिकादीनामपि दशा दिने दिने समीचीनतां यास्यति इति।

4.5 लेखनाभ्यासाय केचन प्रबन्धाः

1) क्रियासिद्धिस्सत्वे भवति महतां नोपकरणे
2) कालिदासस्य कविसार्वभौमत्वम्
3) चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च
4) भारते अद्यतनी आर्थिकी समस्या
5) उद्यमेन हि सिद्ध्यद्धयन्ति कार्याणि न मनोरथैः
6) संस्कृतकाव्यं प्रकृतिश्च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7) आर्जवं हि कुटिलेषु न नीतिः

8) संस्कृतविद्याभ्यासक्रमः

9) धर्मो रक्षति रक्षितः

10) कविः, काव्यं, सहृदयश्च

11) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन

12) भारतीयसंस्कृतिः

13) सम्पूर्णकुम्भो न करोति शब्दम्

14) सत्संगतिः

15) सर्वे गुणाः काञ्चनमाश्रयन्ति

16) सुप्रभातम्

17) हितं मनोहारि च दुर्लभं वचः

18) समयस्य सदुपयोगः

19) आज्ञा गुरूणां ह्यविचारणीया

20) वेदानां महत्त्वम्

21) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः

22) अनुशासनम्

अवलोकनीयाः ग्रन्थाः

1) प्रबन्धरत्नाकरः

2) प्रबन्धप्रकाशः

3) प्रबन्धपारिजातः

4) निबन्धप्रकाशः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5) निबन्धकुसुमाञ्जलिः

6) निबन्धचन्द्रिका

7) Apte. V. S. : Guide to Sanskrit Composition

8) Kale. M. R. : Higher Sanskrit Grammar

9) प्रबन्धमापल्लवः

10) अनुवादचन्द्रिका

(सं) डा. राधाकृष्ण भट्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

NOTES

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

NOTES

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ಕರ್ನಾಟಕ ರಾಜ್ಯ ಮುಕ್ತ ವಿಶ್ವವಿದ್ಯಾನಿಲಯದ ಪ್ರಾದೇಶಿಕ ಹಾಗೂ ಅಧ್ಯಯನ ಕೇಂದ್ರಗಳು
Regional and Study Centres of Karnataka State Open University



(ನಮೂದಿಸಿರುವ ಅಂಕಿ – ಜಿಲ್ಲೆಯಲ್ಲಿರುವ ಒಟ್ಟು ಅಧ್ಯಯನ ಕೇಂದ್ರಗಳ ಸಂಖ್ಯೆಯನ್ನು ಸೂಚಿಸುತ್ತದೆ.)
(The Number indicate the total number of study Centres existing in that districts.)

ಆದೇಶ ಸಂಖ್ಯೆ : ಕರಾಮುವಿ/ಸಿಪಾವಿ/4/809/2007-08 ದಿನಾಂಕ : 17-11-2007
ಒಳಪುಟ : 60 GSM MPM ಕಾಗದ. ವೈಟ್ ಪ್ರಿಂಟಿಂಗ್ ಮತ್ತು ರಕ್ಷಾಪುಟ : 170 ಆರ್ಟ್‌ಕಾರ್ಡ್
ಮುದ್ರಕರು : ವಿನಾಯಕ ಆಫ್‌ಸೆಟ್ ಪ್ರಿಂಟರ್ಸ್, ಬೆಂಗಳೂರು–560 076. ಪ್ರತಿಗಳು : 900
CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri South Cedar



CC-0. In Public Domain. Cuddalore Collection, TN